लस्य दीपार्जं चंद्रसूर्य्याग्नि रूपकः॥ महाज्योतिर्निराकारः स्फुरद्ग्धं चापगोलकं। सत्यलोके बीजकोषे चिन्ता
मणिगृहे शुभे॥ ध्यायेन्निरंजनं देवं रत्नसिंहासनोपरि॥ तस्यान्तिके निजगुरुं कृत्वा ध्यानपरायणं॥ स
कान्तं पूजयेद्देवं रजताचलसोदरं॥ सुवक्रां चारुवदनां सुप्रकाशस्वरूपिणीं। एवं कान्तायुतं देवं स्वमूर्त्ति सर्वाः
स्यं विचिन्तयेत्॥ यथा दर्पणगर्भे तु परिपश्यन्ति पर्वति॥ सहस्रारे महापद्मे तपादेवं विचिन्तयेत्॥ परंब्र
ह्मालयं स्थित तत्परं मोक्षालयं शिवे॥ तत्रैव वर्त्तते नित्यो निकारश्च निश्चलः॥ यस्य रूपं परानन्दं परात्परज वी
गत्पतिः॥ नित्यानन्दपरा देवी कालकालप्रकाशिनी॥ आद्याशक्तिर्महाकाली देवनिर्माणकारिणी॥ जा एमः
यं ते च क्षितौ वृक्षाय यथा पृथ्व्यां प्रलीयते॥ तोयात्तु बुद्बुदं जातं यथा तोये विलीयते॥ जले जेत हि उत्पन्नं लीय
ते च यथा घने॥ तथा ब्रह्मादयो देवाः कालिकायाः प्रजायते॥ तथा प्रलयकाले तु पुनस्तस्यां प्रलीयते॥ ए १२
क्ति ज्ञानं विना देवि मुक्तिर्हास्याय कल्पते॥ एकांशेन भवेद्ब्रह्मा एकांशेन जनार्दनः॥ एकांशेन भवेत् शंभुः का

त्रिये निर्गुणस्यालयं साक्षान्महाकाल्या लयं। ५=

लिकायाः सुलोचने॥ अपरा सा महालीनयादीनां समुद्भवेत्॥ गोष्पदे च यथा तोयं ब्रह्माद्या देवतास्तथा। गो
ष्पदः किं विजानीयात् समुद्रस्य जलं शिवे॥ तेन ब्रह्मा न जानन्ति विष्णुः किं वेत्ति शंकरः॥ सृष्टिकर्त्री यदा काल्यात
न्यन्ते च सुरादयः॥ तथा प्रलयकाले तु पुनस्तस्यां प्रलीयते॥ अतो निर्वाणदा काली पुरुषः स्वर्गदायकः। द
क्षिणस्यां दिशि स्थाने संस्थित श्च रवेः सुतः॥ कालीनाम्ना पलायन्ते। भीतियुक्तः समन्ततः॥ ततः सा दक्षिणा ना
म्नी त्रिभुलोके भुगीयते॥ पुरुषो दक्षिणः प्रोक्तो वामा शक्तिर्निगद्यते॥ वामया दक्षिणां जित्वा महामोक्षप्रदायिनी।
अतः सा दक्षिणा नाम्नी त्रिभुलोके भुगीयते॥ निर्गुणं पुरुषं काल्या सृज्यते लुप्यते यतः॥ अतः सा दक्षिणा ना
म्नी त्रिभुलोगीयते॥ वैष्णवी या महाविद्या कालिका नगदम्बिका॥ साकाररूपा साकाया चनकाकाररूपि
णी॥ हस्तपादादि रहिता सोम... सूर्याग्निरूपिणी॥ तस्याः स्थानं हि कथितं सत्यलोकं वरानने॥ यत्स्थानं सर्व
देवस्य प्रार्थनीयं सदानघे॥ तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेधुना॥ सहस्रदलपद्मस्यैकपत्रे सुलो

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चने॥ सहस्रगोलकंधाम अतो वक्तुं न शक्यते॥ जन्मान्तरसहस्रेण जिह्वाकोटिशतेन च। तद्वक्तुं नहि शक्नोमि एकपत्रस्य शोभनं॥ अतस्त्वं हि वरारोहे विरताभव पार्वति॥ किंचित्कमध्ये यच्छोभा किंचिद्वक्तुं शक्यते
मया॥ तन्मध्ये कर्णिकां देवि तन्मध्ये वीजकोषकं॥ वीजकोषस्य मध्ये तु सुधासागरमुत्तमं॥ लक्षयो
जनविस्तारं सुसुगं तोयमंडलं॥ तन्मध्ये तु मणिद्वीपं सहस्रयोजनं शिवे॥ परितः पारिजातांश्च कदम्ब
वनमुत्तमं॥ मध्ये कल्पद्रुमं तत्र जोनिर्मन्दिरमुत्तमं। चतुर्द्वारसमायुक्तं हेमप्राकारभूषितं॥ मन्दवा
युसमायुक्तं गन्धपुष्पसमन्वितं। देवकन्यासहस्राणि परिचर्य्यापरायणाः॥ तन्मध्ये वेदिकां देवि पंचाश
दक्षरात्मिकां॥ तस्योपरि महेशानि रत्नसिंहासनं शिवे॥ महाकालीमहारुद्रश्च नकाकाररूपकं॥ इन्द्रजा
लवस्वराया भंमहाज्यातिः सनातनः॥ इतिते कथितं कान्ते सप्तस्वर्गक्रमेणादि॥ श्रुत्वा गोपयत्नेन न प्रका य एम
श्यं कदाचन॥ अतिस्नेहेन देवेशि तव स्थाने प्रकाशितं॥ संक्षेपेण मया प्युक्तं विस्तारेण हि शक्यते॥ ॥ १४

इतिश्रीचंडिकाशंकरसंवादे निर्वाणतन्त्रे सत्यलोककथनं नाम दशमः पटलः॥ ॥श्रीचंडिकोवाच॥ त्व
त्प्रसादात् महादेव पवित्रा हं न चान्यथा॥ इदानीं श्रोतुमिच्छामि तत्वज्ञानं सुदुर्लभं॥ श्रीशंकर उवाच
तत्वज्ञानादिकथने एं कृते मममानसं। एतत् प्रसंगश्रवणे विरताभव पार्वति॥ येनज्ञानप्रसादेन विष्णुः
सत्वगुणाश्रयः। शृणु देवि प्रवक्ष्यामि ब्रह्मा लोकपितामहः॥ तत्वज्ञानप्रसादेन शंभुः संहारकारकः॥
अन्ये मुक्ताश्च ये सर्वे तेपि तत्वप्रसादतः॥ तत्वज्ञानं परेशानि कथं वा कथ्यते मया॥ विरताभव देवेशि नहि
पृच्छ पुनः पुनः। इति तस्य वचः श्रुत्वा शांकरी वाक्यमब्रवीत्॥ यदि तत्वं महादेव न मे कथयसि प्रभो॥ प्रा
णत्यागं करिष्यामि पुरतस्ते न संशयः। श्रीशंकर उवाच॥ शृणु देवि प्रवक्ष्यामि तत्वं परमदुर्लभं॥ श्रु
त्वा गोपयत्नेन स्वयोनिरिव सुन्दरि मद्यं मांसं तथा मत्स्यं मुद्रां मैथुनमेव च॥ पंचतत्वमिदं देवि निर्वाणमु
क्तिहेतवे॥ अष्टैश्वर्य्यं परं मोक्षं मद्यपानेन शैलजे॥ मांसभक्षणमात्रेण साक्षान्नारायणो भवेत्॥
मत्स्यभक्षणमात्रेण कालीप्रत्यक्षतां भवेत्॥

मुद्रासेवनमात्रेण भूपूज्यो विष्णुरूपधृक्॥ मैथुनेन महायोगी मम तुल्यो न संशयः॥ तंत्रान्तरे तु देवि
शिमयैव कथितं पुरा॥ माहात्म्यं चास्य धर्मस्य पुरैव कथितं मया। तत्वज्ञानमिदं कान्ते निर्वाणमुक्तिकार
णं॥ एकत्र पंचतत्वानि। यत्रैव मिलनं भवेत्। तत्रैवाहं प्रगच्छामि तेन रामत्समाः सदा॥ सा नारी कालि
का रूपा मत्तेत स्वां प्रलीयते॥ येन राः साधुरूपाश्च तत्वज्ञानपरायणाः॥ जीवन्मुक्ताश्च ते प्रोक्ता ब्रह्मरू
पा न चान्यथा। सायुज्यापि महामोक्षं निर्मुक्तं क्षत्रियादिषु॥ ब्राह्मणः परमेशानि यदि तत्वपरायणः॥
सत्यं सत्यं पुनः सत्यं परतत्वे प्रलीयते॥ यथा तोयं तोयमध्ये लीयते। परमेश्वरि॥ तथैव तत्वसेवायां लीय
ते परमात्मनि॥ इतिते कथितं कान्ते तत्वज्ञानं विमोक्षदं॥ येन ज्ञानप्रसादेन मोक्षसिद्धिर्न संशयः॥ क्षि
तिं विना यथा नास्ति संस्थितेः कारणं सदा। तोयं विना यथा नास्ति पिपासानाशकारणं॥ तमोहन्ता यथा ना एमः
स्ति भास्करेण विना प्रिये॥ विना वह्निप्रयोगेन यथा किंचिन्न पच्यते॥ विना चंद्रेण देवेशि सुधावृष्टिर्न जा १५

यते॥ आत्मगर्भे विना कान्ते ह्युत्पत्तिर्न यथा भवेत्॥ तत्वज्ञानं विना देवि तथा मुक्तिर्न जायते॥ अत एव म
हेशानि गोपनं कुरु यत्नतः॥ दिव्यभावयुक्तानां च तत्वज्ञानं सदा भवेत्॥ वीरभावयुतानां वै तत्वं सेव्यं सदा
नघा। नपशोरालयेकुर्यान्न पशोस्तीन गोचरे॥ नपशोः सन्निधाने च न पशोर्दृष्टिगोचरे॥ अन्यथा पक्षि
कीटस्य दर्शनं नैव कारयेत्॥ सिद्धिर्वर्लभ्यते प्रान्ते यत्कृत्वा सिद्धिमाप्नुयात्॥ एकां शक्तिं समानीय
एकैव साधकः सदा। पूजयेद्धृयत्नेन पंचतत्वेन कौलिकः॥ एवं कृत्वा लभेत् सिद्धिं नान्यस्य दृष्टिगोच
रे॥ श्रीचक्रपूजायन्त्रे वतन्त्रे वधनसिद्धये॥ सिद्धिर्नजायने तत्र कदाचिदन्यसन्निधौ॥ तत्रैव कामनासि
द्धिर्यत्र चक्रं प्रपूजयेत॥ आयुरारोग्यमैश्वर्य्यं श्रीचक्रपूजनाद्भवेत्॥ कीर्त्तिर्वृद्धिर्यशो वृद्धिर्मुक्तिभागी
न संशयः॥ वांछासिद्धिर्ज्ञानसिद्धिर्देव्याः प्रीतिश्च जायते॥ श्रीचक्रपूजां यः कुर्य्यात्स एव शंभुरव्ययः। अ
श्वमेधसहस्राणि वाजपेयशतानि च। इष्टापूर्त्तफलमाप्नोति तत्फलं कौलिकार्चने। वापीकूपतडागा

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिरत्वापत् फलमाप्नुयात्॥ तत्फलात् कोटिगुणितं यदि चक्रं प्रपूजयेत्॥ तदन्नं मेरुतुल्यं द्धि र्दुः सा
सिन्धुसमोपमं॥ पुष्पं च मेरुसदृशं यदि चक्रं प्रपूजयेत्॥ तन्मध्ये वर्त्तते देवि यदि व्याधियुतो नरः॥ शि
वबुध्या प्रपूज्यो हि भ्रान्तिं तत्र विवर्जयेत्॥ सूर्य्यस्य प्रतिबिम्बं यत्तत्तोये परिपश्यति॥ गंगातोये यथा सू
र्य्यहीनतोये तथा पुनः। सूर्य्यस्य दूषणं नास्ति सूर्य्यैकः परिति ष्टति॥ तथैव परमेशानि साधके नास्ति दू
षणं॥ मन्त्राराधनमात्रेन तदात्मा तन्मयो भवेत्। अतएव महेशानि दूषणं नास्ति रेतसि। रेतः पवित्रं
परमं शक्तिर्मोक्षस्य कारणं॥ पूजाहीना च या शक्तिर्जपहीना च या पुनः॥ धृत्वा साधकरे तस्य स्ताना
शिकालिकाश्वयं॥ भ्रान्तिरत्र न कर्त्तव्या यदि मुक्तिं प्रयच्छति। या नारी भ्रान्तिसंयुक्ता आगता चक्रमंडले॥ एमः
सप्तजन्मनि सा नारी चांडाली पतिवर्जिता। एवं रूपा च यां नारीमवज्ञां कुरुते यदि॥ धनपुत्रवर्जितश्च स १६
चंडालो न चान्यथा॥ इति ते कथितं कान्ते तत्त्वज्ञानं मयोदितं। ते पुनर्जननी गर्भे न विपत्ति करा च न। जीव

विमोक्षदं· येनारिहमहेशा नि तत्त्वतां

मुक्ता भवते प्रोक्ताः शिवरूपाश्च ते नराः॥ शृणु देवि प्रवक्ष्यामि कौलिकस्य च लक्षणं॥ यस्मिन् देवि परा वे
चारो निर्दिष्टो मंत्रसाधने॥ नराचारविशिष्टो यः कौलिकश्चैव कीर्त्तितः॥ शैवे शाक्ते गाणपत्ये सौरे चां
द्रे सुलोचने। तत्त्वज्ञानमिदं प्रोक्तं वैष्णवे शृणु यत्नतः॥ इति निर्वाणतन्त्रे तत्त्वज्ञानविवरणं नामए
कादशः पटलः॥ ॥श्रीचंडिकोवाच॥ शृणु नाथ परानन्द मम प्राणेश्वर प्रभो॥ वैष्णवस्य यथा तत्त्वं त
न्मे ब्रूहि जगत्पते॥ श्रीशंकर उवाच॥ शृणु तत्त्वं वरारोहे वैष्णवस्य त्रिलोचने॥ गुरुतत्त्वं मंत्रतत्त्वं
 मनस्तत्त्वं सुरेश्वरि॥ देवतत्त्वं ध्यानतत्त्वं पंचतत्त्वं वरानने॥ तत्रादौ श्रीगुरोस्तत्त्वं लिदा हस्यामि पार्वति॥
मत्रैत्त्वं वर्त्तिकायुक्तं देहस्थं त्रस्त नैजसं॥ गुरुणा मंत्रदानेन तत्स्त्वं दीपितं भवेत् देवतायाः शरीरं
हि जीवात्रुत्पद्यते ध्रुवं॥ अतएव हि तस्यात्मा देवरूपो न संशयः॥ ईश्वरस्य तु यद्बीजं न देवश्चाक्षरा
त्मकं॥ तेन वर्णात्मकं देहं जं तो देवनसंज्ञपः। मंत्रवर्णोसि वर्णाली यन्ते परमेश्वरि॥ वर्णतत्त्वमिदं दे

नि

विमम सर्वस्वं यद्भवेत्॥ स्वयं देवो न चान्यो स्मिनि र्मलो देवरूपकः। सर्वत्र देवतां ध्यायेत्तृणगुल्मलतादिषु॥ ध्या
नेन लभते सर्वं ध्यानेन विष्णुरूपकः॥ ध्यानेन सिद्धिमाप्नोति विना ध्यानेन सिध्यति। इति ते कथितं देवि वैष्णवस्य
सुरेश्वरि॥ यज्ज्ञानादमरत्वं च विष्णुरूपो न संशयः॥ यः कुर्य्यात्परमेशानि तत्त्वज्ञानं मयोदितं॥ स्वर्गभा
गी भवेन्मर्त्यो विष्णुलोके महीयते॥ यदि भक्तिर्यतो मर्त्यो मनसा चिन्तयेत् सदा॥ तेन रान हि गच्छन्ति कदाचि न
दं परमं स्थिरं॥ इति ते कथितं तत्त्वं वैष्णवस्य सुरेश्वरि॥ यज्ज्ञानादमरत्वं च लभते नात्र संशयः॥ इति श्रीनि
र्वाणतंत्रे विष्णोस्तत्त्वकथनं नाम द्वादशः पटलः॥ श्रीचंडिकोवाच॥ रहस्यात्मकं दशार्णस्यैव पूर्वैव कथितं ण
तु मे॥ प्रकाशरूपेणतं त्वं कथय स्वरपानिधे॥ श्रीशंकर उवाच॥ शृणु देवि प्रवक्ष्यामि मंत्रं दशाक्ष एमः
रं परं॥ यस्य श्रवणमात्रेण मूढोपि विष्णुरूपकः॥ पुंमंत्रोपि च देवेशि शक्तिमंत्रं जपेद्यदि॥ अज्ञात्वा ७
तन्महामंत्रं स भवेद्धूलिरणस्सः॥ अज्ञात्वा तन्महामन्त्रं तत्त्वज्ञानी भवेद्यदि॥ तथापि नरकं गच्छेदिति दे

मायाबीजं वधूबीजं लक्ष्मी कलीच पाशकं॥ गगनं पक्षिबीजं च
वस्य सम्मतं॥ शृणु देवि प्रवक्ष्यामि दशार्णमंत्रमुत्तमं॥ यज्ज्ञानादमरत्वं च लभते नात्र संशयः॥ अस्य
वह्निकान्तान्ततः प्रिये। इति ते कथितं चंडि दशाक्षरमनूत्तमं। ईजोपरि जपे देनत् दशा
श्रवणमात्रेण नरो नारायणो भवेत्॥ अस्य प्रसादमात्रेण चंडि निर्वाणतां व्रजेत्। सर्वे देवाः सदा राश्च दशार्णी ज्ञायते ध्रुवं॥ म
र्णपरमेश्वरि॥ अस्य मंत्रात्महामंत्राज्जायन्ते नात्र संशयः॥ तस्माद्यत्नेन देवेशि दशा
हाविद्यो पासकश्च दशार्णं नहि पश्यति॥ इह लोके दरिद्रश्च परे च नरकं व्रजेत्॥ नरो गुरुरुत्तमः॥ सं
र्णश्रावये हुरुः॥ केवलं श्रवणं कुर्य्यात्तं जपेत्साधकोत्तमः॥ यः श्रावये द्दशा र्णं च। स नरो गुरुरुत्तमः॥ यथामरतरंगिन्या न
३ नदाना यथा देवि तथैव सद्गुरुस्तनः। दशार्णदाता यो देवि स एव परमो गुरुः॥ त्वत्समा यदि नारी च मत्समः पुरुषोस्ति
समासदिकलापगा॥ दशार्णस्य समो नास्ति मंत्रोपि सुरपूजिते॥ र्णलौहमस्ति चेत्॥ दशार्णस्य
च। दशार्णस्य समो नास्ति मंत्रो हि कथितो मया॥ दशकान्तेस्य स्वर्णस्य

म

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समंत्रं कथ ये शुस्त दा प्रिये॥ श्री प्रासादी स्त्वयं मंत्रो दक्षिणः परमेश्वरि। ऊर्द्ध्वाम्नाये महातंत्रे मा हात्म्यं कथयामि ते॥ अतः परं प्रवक्ष्यामि परं दंडधारणं॥ साधुरूपो गृहस्थो वा ब्रह्मणो ब्रह्मचारिणः॥ सर्वो पाप परित्य
क्तः सदा धर्मपरायणः॥ जितेंद्रियो जितक्रोधः समत्वं सर्वजातिषु॥ शत्रौ रिपौ समत्वं च समं स्वर्णे च पार्थिवे॥
दयाभावश्च सर्वत्र पुत्रे मित्रे रिपौ भवेत्॥ लाभालाभे जये नाशे निन्दायां पौष्टिके तथा॥ काये प्राणे न सं
बंधेमस्तु मारस्य युगान्तिके॥ ब्रह्मज्ञानं विना ज्ञानं यस्य चित्ते न विद्यते॥ सन्यासधर्मं तस्यैव नान्यस्य
सुरपूजिते॥ सन्यासधारणं कार्य्यं विप्रस्य मुक्तिहेतवे॥ यो विप्रो धारये दंडं स एव नारायणः स्वयं॥ चतुर्भुजाः प्र
जायन्ते॥ दंडधारणमात्रतः॥ सर्वलक्षणसंयुक्तो ब्राह्मणो गमनं चरेत्॥ गत्वा च दंडिनं दृष्ट्वा प्रणमेत् दंड
वत् क्षितौ॥ त्वमेव देवदेवेश त्वमेव त्राणकारकः॥ त्वमेव जगतां वन्द्य स्त्राहि मां शरणागतं॥ इति श्रुत्वा दंड रामः
धारी प्रसन्नः सादरात्मनं॥ कस्त्वं कस्य सुतस्त्वं हि कथमागमनं वद॥ श्रुत्वा तद्वचनं विप्रः प्रोवाचात्म निवे १८

ना२

दनं॥ विप्रवंशे समुद्भूतो मुमुक्षो ऽहं विवेकवान्॥ नास्ति मे पितरौ साक्षात्। नास्ति मे स्त्रीसुतादयः॥ मृतौ च मा
तापितरौ मे नाथ भ्रात्रादयः सुताः॥ पश्चात्सकान्ता शिशुः। स्य हमत्यन्तनापवान्॥ अत एवं तो स्वामिन् देहि मे च॰
परमाश्रयं। सत्यं कुरु द्विजश्रेष्ठ यदुक्तं वै मम अन्तिके॥ मिथ्याभाषणदोषेण ब्रह्मवर्त्म विवर्जितः॥ भव
त्येव न सन्देहो द्विजमस्तु रतो वद॥ स्थितायां यौवनायां च कान्तायां परमेश्वरि॥ सर्वं हि विफलं तस्य
यः कुर्य्याद्दंडधारणं॥ पितरौ विद्येते देवि यः कुर्य्याद्दंडधारणं। विद्यते च वालभावो यस्य कान्तासुत
स्तथा। सन्यासधारणं तस्य वृथा हि परमेश्वरि॥ सद्गुरुश्चापि शिष्यश्च रौरवाख्यं प्रयच्छति॥ इत्या
दिदृढ वाक्यन्तु श्रुत्वा दंडी जितेंद्रियः॥ सन्यासदानं तस्यैव दद्यात्स्त्रीच सावती। आदौ दक्षिण
रं मंत्रं प्रथमं श्रावयेद्गुरुः॥ तत्स श्रुत्वा च महावर्त्मगमनं कारयेत्ततः॥ क्रोशं वा क्रोशयुग्मं वा वेगेन गम
नं चरेत्॥ गुरुणा स हशिष्येण दृष्टे। दृष्टे विधावतः॥ तिष्ठति स्म महा वा दौमांत्यस्कानद्विगच्छतु॥

शिष्यः परमहंसस्त्वं तत्समो नास्ति भूतले॥ क्षन्तव्यमपराधं मे त्वं हि विभुः स्वरूपधृक्। त्वमेव जगतां
वल्लन्य स्वामिव सर्वपूजितः॥ त्वमेव परमो हंसस्तिष्ठ तिष्ठ तु मा व्रज॥ सशिष्य दंडिना देवि इति वाक्यं वदे
न्यतः॥ अतः सः परमो हंसः पथि शेते प्रमोदितः॥ तस्यैव दर्शनार्थाय चान्तरीक्षे सदेवताः॥ सस्त्रीकाः
सपरिवाराः आयान्ति दिग्विदिक्षु च। एतस्मिन् समये दंडी शान्तयेत् शिष्यमुत्तमं॥ फूत्कारं वहु वो
दत्वा मंत्रेणानेन सुव्रते॥ फूत्कारैर्वायु योगेश्च पुनः प्राणं प्रयोजयेत्॥ जन्मान्तरन्तु तस्यैव तत्स
र्वो जायते किल। जन्मान्तरं समालोक्य संस्कारमाचरेत् गुरुः॥ कुंडोन्तिके समानीय। अन्नप्राशनमा रामः
चरेत्॥ अमुकस्य समाभाष्य पुष्पं वह्नौ विनिक्षिपेत्॥ इति नाम्नानुसंस्थाप्य महासंस्कारमारभेत्॥
ततोपि दंडिना देवि शिष्याय ज्ञानहेतवे॥ शृणु शिष्य महाधीर महावाक्यं हृदयं कुरु॥ जन्मान्तरं तु त १९
स्यैव दृष्टि व्यानाधिकारिता॥ मत देह स्वरूपोयं शरीरे येन संशयः॥ विरतो भव सर्वत्र तोपाद्या हरिश्च

ष्या। ब्राह्मणेनैव यद्दत्तं तन्मात्रं भोजनं तव॥ पंचतत्वं सदा सेव्यं गुप्तभावे जितेन्द्रियः॥ सदैव मानसीं
पूजां सदा मानसतर्पणं॥ त्रिसन्ध्यं मानसं यागं नाभिकुंडे प्रयत्नतः॥ सदैव मानसं भोगं त्यागं कुरु प्र
यत्नतः। षड्वर्गेषु जितो भूत्वा नरो नारायणः स्वयं॥ भवत्येव न सन्देहो दंडधारणमात्रतः॥ पितृवंशो
सप्तदश मातृवंशे त्रयोदश। कांतापाः सप्तमश्चैव लक्ष्मीनारायणो भवेत्॥ इति श्रुत्वा वचस्तस्य शि
ष्यश्चैतानब्रवीद्वचः॥ यदुक्तं मयि सुत्स्य पर्वा तत्करोमि निरन्तरं॥ पंचतत्वं सदा सेव्यं कस्माल्लाभं वद
स्व मे॥ यत्रैव वर्त्तते दंडी वद्ध शिष्य समाहतः॥ तत्र गत्वा प्रयत्नेन पंचतत्व विचेष्टया॥ अथवा वीर
मध्येतु यत्नेन गमनं चरेत्॥ तत्वज्ञानी गृहस्थो सन्निधाने व्रजेत् किल॥ सुदूरमपि गन्तव्यं यत्रास्ते
कुलनायकः॥ भिक्षा चर्य्या न च स्वार्थं देवतायाः कृते पुनः॥ आचार्य्य पत्रीं दृष्ट्वा तु भिक्षां कुर्य्यात्समा
हितः। हे मातर्देहि मे भिक्षां कुंडलीतर्पयाम्यहं। एवमुक्त्वा ततो दंडी महासंस्यारमाचरेत्। कुंजान्ति

स्म३

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

केसंमोनीयद्धोमयेद्विधिपूर्वकं॥ ततोह्वनेतकरंघृत्वा आज्येराष्टाहुतीपुनः॥ विपरीतक्रमेणैवकुर्य्या
दृंडविशेषणं॥ ततःकुर्य्यात्प्रयत्नेनअन्तर्यज्ञोपवीतकं॥ शिखान्तस्यथि[illegible]खामंत्रैःपूगमध्येविनि
क्षिपेत्॥ मूलेनयज्ञसूत्रन्तुतस्मिन्नेवनिवेशयेत्॥ घृतमृत्तिकयापुगंविलिप्यशोधयेत्ततः॥ ततः
पूगंमूलमंत्रैर्दंडमध्येविनिःक्षिपेत्॥ पूर्णाहुतिंततोदद्यात्तत्पूगमानयेत्सुधीः॥ यज्ञसूत्रंस
शिखायांतत्पुगंशोधयेत्प्रिये॥ मूलमन्त्रंजपेत्तत्रगजान्तकसहस्रकं॥ ततश्चश्रावयेन्मन्त्रं
कालिकायाश्चसुन्दरि॥ अथवाश्रावयेन्मंत्रतारायाःपरमदुर्लभं॥ मूलमन्त्रंसमुच्चार्य्यपूगभस्मप्र
यत्नतः। भक्षणात्तत्क्षणात्साक्षाद्दंडीयज्ञोपवीतवान्॥ भवत्येवनसन्देहोनरोनारायणोभवे
त्॥ विल्वदंडंसमानीयवंशाद्येकंसमानयेत्॥ विल्वदंडेकालिकायाजपेन्मन्त्रंप्रयत्नतः॥ जीवन्या एमः
संततःकृत्वादंडेदेवींविचिन्तयेत्॥ विल्वस्थितंचचैतन्यंवंशदंडेनियोजयेत्॥ इष्टदेवीस्वरूपेण २०

दंडोयंपरमेश्वरि॥ शिष्यस्यदक्षिणेहस्तेदंडस्यस्थानमाचरेत्॥ कमंडलुंसमानीयवारुणेप्रपूजयेत् च
।वारुणींनिक्षिपेत्तत्रमूलमंत्रंततोजपेत्। अष्टोत्तरशतंज्ञात्वातस्यवामकरेन्यसेत्। गैरिकंकौपिनंवस्त्रंय
त्नेनपरिधापयेत्॥ दंडधारणमात्रेणनरोनारायणोभवेत्॥ अघावधिमहामा[illegible]यांदंडोपरिविभावय।
गुरुपुजांमहाकालीदंडोपरिविभावयेत्॥ साक्षान्नारायणस्त्वंहिदयाधर्मपरोभव॥ तवमातापितावा
पिसर्वदंडान्तिकेस्थितं॥ चौरवद्भ्रमणंगेहेगृहस्थस्यद्विजस्यच। नारायणंसदाभाष्यद्वारेतस्यव्रजे
त्सुधीः॥ इतिश्रुत्वागृहस्थश्चपुटाञ्जलिपरोभवेत्॥ द्वारेचदंडिनंदृष्ट्वाप्रणमेत्ब्राह्मणोवरः॥ भी
क्षांदद्यात्प्रयत्नेनकूर्ममांसंविनांप्रिये॥ आदायभीक्षांदेवेशिचौरवद्भ्रमणंचरेत्॥ तथाहिनगरंग
त्वानिराम्नवसतिंचरेत्। तीर्थभूमिंततोगत्वासप्तरात्रंवसेत्ततः॥ ब्राह्मणोदंडिनंदृष्ट्वाप्रणमेद्विधि
पूर्वकं। तोयपूर्णंचदेवेशिकिंवाशून्यकमंडलुं॥ दृष्टिमात्रेणतत्पात्रंपूर्णतोयंभवेद्ध्रुवं॥ दद्याल्ल

यदिमोहेनसंभवेदापदाश्रयं॥ त्रिंशद्वर्षसहस्राणिवनेचविटपोभवेत्॥ इतितेकथितंचंडिसंन्यास
धारणंपरं॥ पाषंडायनवक्तव्यंप्राणान्तेपिकदाचन॥ ॥इतिनिर्वाणतंत्रेचंडिशंकरसम्वादेत्रयोदश कार
पटलः॥ श्रीशंकरउवाच॥ ॥शृणुदेविप्रवक्ष्यामिअवधुतोयथाभवेत्॥ वीरस्यमूर्त्तिजानीयात्तत्सदा
तत्वपरायणं॥ यद्रूपंकथितंपूर्वंसंन्यासधारणंपरं॥ तद्रूपंसर्वकर्म्माणिप्रकुर्योद्वीरवल्लभः॥ दं
डिनंमुंडनंदेविआवश्यकंसमाचरेत्॥ यथातथानैवकुर्य्याद्वीरस्यचमुंडनं॥ असंस्कृतकेशा
नांमुंडनेक्षिकुचोच्चयां॥ अस्थिमालाविभूषोवारुद्राक्षान्वापिधारयेत्॥ दिगम्बरोवावीरेंद्रस्त्वाथवाकौ
पिनीभवेत्॥ रक्तचंदनदिग्धांगःकुर्य्याद्भस्मांगभूषणं॥ क्षमादानंतपोध्यानंवीरभावेनशैलजे॥ शि
वोहंभैरवानन्दोमुक्ताहंकुलनायकः॥ एवंभावपरोमंत्रीहेतुयुक्तःसदाभवेत्॥ सम्विदासेवनंकुर्य्या एमः
त्।सदाकारणसेवनं॥ भवेत्साक्षात्पुरुषःशंभुरूपोनसंशयः॥ निर्वाणमुक्तिमाप्नोतिब्राह्मणोवी २१

रभावतः॥ अवधूतःक्षत्रियश्चमहायोगीनसंशयः॥ स्वरूपोपिभवेद्वैश्यःशूद्रोपिसद्गलोकभाक्॥ संपू
र्णफलमाप्नोतिविप्रोनिर्वाणतांव्रजेत्॥ त्रिभागफलमाप्नोतिक्षत्रियोवीरभावतः॥ पादद्वयन्तुवैश्यस्य
शूद्रस्यचैकपादकं॥ ब्राह्मणस्यविनान्यत्रसंन्यासोनास्तिचंडिके॥ कुर्य्यान्मोहेनयोन्यत्रसेवयापाश्रयो
नरः। युगभावेनदेवेशिशृणुयात्प्राणवल्लभे॥ संन्यासिनासदासेव्यं॥ पंचतत्वंवरानने॥ द्वादशाब्दे
तुदेवेशियदिमृत्युर्नजायते। सेवचानन्दविख्यातोद्वादशाब्देसरस्वती॥ अवधूतस्यव्याख्यातःशृणुष
पर्वतात्मजे॥ वनारण्येभारतीचपुरीचगिरिरेवच॥ एकस्थानेचसंस्थित्वाइष्टध्यानादिकंचरेत्॥ यो
मंत्रःतद्वलभाक्तःशरणःपरिकीर्त्तितः। मष्टकेशोजटाजूटःसदातचलवत्चरेत्। अन्तयोगीमहावी
रोदरन्यःसेवयेत्शैलजे॥ नानाशास्त्रेषुयोविज्ञोनानाकर्म्मविशारदः॥ सदेहदेवीभावेनभावयो
घोहिचांगनां। सएवभारतेवीरोमहाज्ञानीजितेन्द्रियः॥ सदोर्द्धबाहुर्योवीरोमुक्तकेशोदिगम्बरः॥ स

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवममभावेनभावयेद्योनरोत्तमः॥ इष्टदेवी विनानास्ति शवीरः परिकीर्त्तितः॥ नानादेवेषु पीठेषु क्षे
त्रेषु तीर्थभूमिषु॥ भ्रमणं कुरुते नित्यं कुर्य्याद्यत्नेन पूजनं। देवतायाः सदा ध्यानं श्रीगुरोः पूजनं त
था॥ अन्तर्योगेन योनिष्ठः स वीरः पुत्रि देव च। अवधूताश्रमो देवि यस्य भक्तिः सुनिश्चला॥ तस्य तु
ष्टा भवेत् काली किं न सिध्यति भूतले॥ अवधूतं समालोक्य यं भूवत् पूजनं चरेत्। शक्तितः पंच त
त्त्वानि यत्नेन च निवेदयेत्॥ पंचतत्त्वं विना भद्रे आनन्दो नैव जायते॥ अतो हि भक्तिभावेन तेनै
व पूजनं चरेत्॥ इति ते कथितं कान्ते अवधूतस्य लक्षणं॥ येन विज्ञानमात्रेण शिवत्वं लभते नरः एमः
॥ शठाय भक्तिहीनाय न दातव्यं कदाचन॥ गुरुभक्तिविहीनाय तत्त्वनिन्दापराय च॥ इदं तंत्रं
सुगुप्तं च प्राणान्ते पि कदाचन॥ न श्रावयेद् भक्ताय सिद्धिहानिः प्रजायते॥ कदाचिद्दाक्षे पुत्राय २२

स्वशिष्याय महात्मने॥ श्रावयेद् भक्तियुक्ताय यदि तद्योग्यता भवेत्॥ श्रुत्वा गोपयत्नेन स्वयोनिमिव शै
लजे। संक्षेपात् कथितं किंचित् किमन्यत् श्रोतुमिच्छसि॥ ॥ इति श्रीनिर्वाणतन्त्रे चंडिका शंकर
संवादे अवधूताश्रमविवरणं नाम चतुर्दशः पटलः समाप्तः॥ ०॥ संवत् १८५५०॥ ०॥ ॥०॥

इदम्पुस्तकम् श्रीश्रीश्री रणबहादुरसाहदेवस्य २३

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निर्वाणतन्त्रका मातृका 'ख'का प्रतिलिपिहरू



A.९६९/१०

श्रीराष्ट्रिय अभिलेखालय नेपाल	NATONAL ARCHIVES NEPAL
विषयः शैवतन्त्रम्	Subject:
पुस्तक नामः निर्वाणतन्त्र	Mansccript-Name:
ल. सं. पं २७४१	C. No.
वि. सं. ६९५	S. No.
पत्र संः १६	Folio. No.
आकार ३६ x १५ १/२	Size.





CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं. २
र्वाणतंत्रे प्रथमः पटलः॥१॥ ॥श्रीचंडिकोवाच॥ त्वत्प्रसादान्महादेव श्रुतं तु सन्निरूपणं॥ इदानीं श्रोतुमिच्छामि क्षितौ सृष्टिर्यथा भवेत्॥ ॥श्रीशिव उवा
च॥ शृणु देवि प्रवक्ष्यामि यथा सृष्टिः प्रजायते॥ सत्यलोके महाकाली महारुद्रेण संयुता॥ चंपकाकृतिविस्तारचंद्रसूर्याग्निरूपका॥ अनादिपुरुषसंयु
क्तात्तदंसा जीवसंज्ञकाः॥ ज्वलदग्नेर्यथा देवि विस्फुरंति विस्फुलिंगकाः॥ तस्याश्च तत्परं विंदु यदा भूमौ पतत्यपि॥ तदैव मत्प्रसादेवि संज्ञायुक्तो भवत्यपि
॥स्थावरादिषु कीटेषु पशुपक्षिषु शैलजे॥ चतुरशीतिलक्षं वै जन्म चाप्नोति सोव्ययः॥ ततो लभेत्परेशानि मानुष्यं दुर्लभं तनुं॥ यतो मानुषदेहस्तु ध
र्माधर्माधिपश्च सः॥ ततोपि लभते जन्म पुनर्मृत्युभवाद्ध्रुवात्॥ जायते म्रियते चैव कर्मपाशात्तु निश्चयः॥ चतुरशीतिलक्षेषु नानायोनिषु शैलजे॥ ॥• मिप
श्रीचंडिकोवाच॥ कथं वा लभते जन्म कथं मृत्युर्भवेत्प्रभो॥ तत्सर्वं महादेव श्रोतुमिच्छामि तत्वतः॥ ॥श्रीशंकर उवाच॥ इह यत्क्रियते कर्म त
त्रैवोपभुज्यते॥ जीवलक्षणजं लोके च देहाद्देहांतरं व्रजेत्॥ संध्याप्यवोत्तरं देहं देहं त्यजति पूर्वजं॥ इति श्रुत्वा च सा चंडी पप्रच्छ परमेश्वरं
॥मासे वो नरदेहे तु पिंडदानादिकं कथं॥ शृणु देवि प्रवक्ष्यामि याद्देहं तद्देवदेहि॥ मासाद्देहः परेशानि वायुरूपो न चान्यथा॥ वायुरूपो यतो
देह आकाशस्थो निराश्रयः॥ अतश्च पिंडदानेन वायुस्थिरतरो भवेत्॥ प्रथमे मासकं देवि जायते च क्रमावधि॥ ततोथ मनुरंगत्वा ध शि
र्माधर्मादिकं ह्रियते॥ तद्बुद्ध्वा चापरे किंचित्तु यदकर्म न विद्यते॥ यमाज्ञया तदा जीवः प्रयायो वसुसाधनं॥ तस्मात्कर्मानुसारेण

वपा।
यदि स्यात् दुर्लभं तनुं॥ महाविद्यां भाग्यवशात् स्वाज्ञोति परमं गुरुं॥ तत्वज्ञानं महेशानि यदि भाग्यं लभेत्॥ तदेव परमं मोक्षं याव ब्रह्मांडमु
च्छति॥ ब्रह्माण्डस्य महामोक्षं सायुज्यं क्षत्रियस्य च॥ सारूप्यं वोरुज्ञानस्य शूद्रस्य सहलोककं॥ महाविद्याप्रसादेन पुनरागमनं नहि॥ इह ब्रह्मां
ड शोधेतु सर्वमोक्षं यदाशिवे॥ तदा सर्वस्य निर्वाणं भवत्येव न संशयः॥ ॥श्रीचंडिकोवाच॥ इह ब्रह्मांडवासेतु किं पुनः परमेश्वर॥ तत्सर्वं श्रो
तुमिच्छामि यदि स्नेहोस्ति मां प्रति॥ ॥श्रीशंकर उवाच॥ ब्रह्मांडस्य वासदेशो ब्रह्मांडाद्बहवः स्थितः॥ अनंतस्य प्रमाणं तु किं वक्तुं शक्यते म
या॥ सारवनिर्मितं सर्वं सेव्यसर्वं सुरेश्वरि॥ ॥इति श्री चंडिकाशंकरसंवादे निर्वाणतंत्रे द्वितीयः पटलः॥२॥ ॥श्रीशिव उवाच॥ प्रकृत्या जाय
ते पुंसां प्रकृत्या सृज्यते जगत्॥ लोयाद्यद् बुद्बुदं देवि यथा तोये विलीयते॥ प्रकृत्या जायते सर्वं पुनस्तस्यां विलीयते॥ तस्मात् प्रकृतियोगेन जायते
नान्यथा क्वचित्॥ ब्रह्मविष्णुशिवं देवि प्रकृत्या जायते ध्रुवं॥ तथा प्रलयकाले तु प्रकृत्या लुप्यते पुनः॥ शाक्ताश्च वद्विजाः सर्वे न शैवा न च वै
ष्णवाः॥ उपासते यतो देवीं गायत्रीं परमाक्षरीं॥ गायत्रीं शृणु चार्वंगि व्रतु वेदप्रपूजितां॥ वेदमाते निविख्यातां त्रिवर्गफलदायिनीं॥ हालां
हलं समुद्धृत्य नाभ्यक्षरं समुद्धरेत्॥ वामकर्णसमायुक्तं पुनर्नाभिं समुद्धरेत्॥ कर्णयुक्तं मूर्द्धिरेफं ततश्च सुरवन्दिते॥ चाक्षणं च समायुक्तं
चंद्रबीजं ततः परं॥ नादयुक्तं रवगयुतं वै कं वाहृति मुद्धरेत्॥ ततश्च समुद्धृत्य सवितुस्तदनंतरं॥ वरेण्यमिति चोच्चार्य भर्गो देवस्य धी

नि.तं. ३
महि॥ धियो यो नः प्रचोदयात्॥ प्रणवं तदनंतरं॥ ततश्चाधीत गायत्री प्रणवं तदनंतरं॥ इति जप्त्वा महेशानि साक्षान्नारायणो भवेत्॥ धियो यो मे म
भागे चयकारद्वयमेव च॥ तत्र तत्र महादेवि अनंतफलमेव च॥ इति जप्त्वा महेशानि मुक्तो भवति तत्क्षणात्॥ अन्त्ययकारयोस्थाने योकार इति यः
पठेत्॥ स चांडाल इति ख्यातो ब्रह्महत्या दिने दिने॥ अतएव महेशानि तव स्नेहात् प्रकाशितं॥ सावित्री परमा विद्या त्रैलोक्ये सुदुर्लभा॥ अस्या
ग्रहणमात्रेण भूर्भुवःस्वो न संशयः॥ अंगन्यासस्य मंत्रस्य तच्छृणुष्व प्रियंवदे॥ प्रणवद्वयं हृत्पद्मे भूकारं शीर्षदेशके॥ भुवः शिखायां
कारं कवचे विन्यसेत्सुधीः॥ नेत्रत्रये भूर्भुवःस्वः स्वःकारं करयुग्मके॥ नमः स्वाहा वषट् हुं वौषट् फट् च क्रमतो न्यसेत्॥ ध्यानं शृणु वरारो
हे यथा ध्यात्वा यजेन्नरः॥ श्वेतवर्णां समुद्दिष्टां कौशेयवसनां तथा॥ श्वेतैर्विलेपनैः पुष्पैरलंकारैश्च भूषितां॥ आदित्यमंडलांतस्था ब्रह्मलोक
गता थवा॥ अक्षसूत्रधरा देवी पद्मासनगता तथा॥ ॐ तेजोसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानां गायत्री एकपदी द्विपदी त्रि
पदी चतुष्पदः॥ नमस्ते तुरीयाय दर्शनंतायप्रदायपरोरजसे॥ एवं ध्यात्वा यजेद्देवीं गायत्रीं परमाक्षरीं॥ पुनर्ध्यात्वा यंत्रपीठे पुष्पं दद्या ध
रानने॥ आदो त्रिकोणं विन्यस्य षट्कोणं तद्बहिर्न्यसेत्॥ वृत्तं चाष्टदलं पद्मं तद्बहिश्चतुरस्रकं॥ चतुर्द्वारसमायुक्तं सावित्रीयंत्रमीरितं॥ शिवः ३
जीवन्यासादिकं कृत्वा प्रजयेच्चक्रमार्गतः॥ हालाहलादिकं मंत्रं समस्तं परमेश्वरी॥ समुच्चार्य वदेत्पाद्यं सावित्रीं नियुतां ततः॥ त्यागात्मक
को२

मनुः पश्चात् यथाविभवविस्तरैः॥ पूजयेत् कृत्यनेन वा नान्यथा ब्राह्मणः स्मृतः॥ द्रव्याभावे वरारोहे पाद्याद्यैरुदकात्मकैः॥ पूजयित्वा यजेद्देवीं गायत्रीं
परमाक्षरीं॥ दशभिर्जन्मजनितं शतेन च पुराकृतं॥ त्रियुगं तु सहस्रेण गायत्री हंति पातकं॥ महेशवदनोत्पन्ना विष्णोर्हृदयसंस्थिता॥ ब्रह्मणा स
मनुज्ञाता गच्छ देवि यथेच्छया॥ इति मंत्रं समुच्चार्य देव्या वामकरे बुधः॥ समर्पयेज्जपफलं ततस्तोत्रादिकं पठेत्॥ विधिवज्जपं जपेन्न पुरश्च
रणमीरितं॥ तद्दशांशं कुतेन्त्याच्च पुरश्चरणसिद्धये॥ होमस्य तु दशांशेन तर्पणं तदनंतरं॥ तर्पणस्य दशांशेन अभिषेकं ततः परं॥ अभिषेक
दशांशेन कुर्याद्ब्राह्मणभोजनं॥ ततः सिद्धा भवेद्देवी त्रिवर्गफलसाधिनी॥ माहात्म्यं चास्य मंत्रस्य चतुर्वेदेन भाषितं॥ अथ मार्जनमंत्रस्य
प्रकारं शृणु यत्नतः॥ भूर्भो शिरसि वा काशे आकाशे भुवि मस्तके॥ मूर्द्धि भूर्भो तथा काशे आकाशे भुवि मस्तके॥ यजुर्वेदे तु रेफः सामा
थर्वयोर्दिनं देवि ऋग्वेदे शृणु शैलजे॥ भूम्यो शिरसि वा वर्ण्या भूर्भो मस्ये शिरे तथा॥ भूर्भोष्मन्ये तथा मूर्द्धि चाथ मार्जनमाचरेत्॥ आपो हि ष्ठे
ति यो मंत्रा अष्टाक्षरपदेन तु॥ मार्जनं यत्क्रमेणैव सर्वपापविनाशनं॥ अतिक्रमेण चार्वंगि ब्रह्महत्या पदे पदे॥ अतएव क्रमं सर्वं
तव स्नेहात् प्रकाशितं॥ स्तुतिं च कवचं देवि पठित्वा प्रणमेत्सुधीः॥ ॥श्रीदेव्युवाच॥ तुरीयं धाम यो देव परमात्माः सपद्वहि॥ शिवः पद्मस्थि
तेवाद्ये नमस्कारः कथं भवेत्॥ ॥श्रीशिव उवाच॥ शिरपद्मे महादेव स्तत्रैव परमो गुरुः॥ न स्रममो नास्ति देवेशि पूज्यो हि भुवनत्रये॥ तद्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं. ४

पंचिंतये न्मंत्री बालेगुरुचतुष्टयं॥ तदंशा भावसंभूता ये चान्ये गुरवो जनाः॥ तथैव ब्राह्मणास्सर्वे चांशावतारसंस्थिताः॥ यदैव बालेवेतंश्च
ब्रह्मको भावयेत्तदा॥ सहस्रारे महापद्मे तदा चिंतां विवर्जयेत्॥ प्रत्यक्षे दर्शने देवि बाह्ये तं ब्राह्मं चिंतयन्॥ नमस्कारादिकं देवि कुर्यात्साध
कसत्तमः॥ एभ्यो दर्शनमात्रेण नमस्कारादिकं चरेत्॥ न कुर्याद्यदि मोहेन सभवेदापदाश्रयः॥ ब्राह्मणादीन्समालोक्य ब्रह्मचारी यतिस्तथा॥
दृष्टिमात्रेण गिरिजे प्रणमेद्दंडवद्भुवि॥ महापातककर्त्तारो पितृघ्नो भवति तत्क्षणात्॥ न कुर्याद्यदि मोहेन महापातकवान्भवेत्॥
रक्तवस्त्रं समालोक्य तथा भस्माङ्गभूषणं॥ दंडहस्तं त्रिशूलं च दृष्ट्वा प्रदक्षिणत्रयं॥ प्रकुर्यात्साधकश्रेष्ठ अन्यथा पातकी भवेत्॥
॥ ॥इति श्रीनिर्वाणतंत्रे तृतीयः पटलः॥३॥ ॥श्रीदेव्युवाच॥ संन्यासी कीदृशं नाथ अवधूतं च कीदृशं॥ कीदृशो वा ब्रह्मचारी
गृहस्थो वाथ कीदृशः॥ ॥श्रीशिव उवाच॥ दिव्यप्रकाशमूर्त्तिं च चिंतयेद्दंडधारिणं॥ गृहस्थस्त्वदिव्यमूर्त्तिं चंदनादिविभूषितं॥ सर्व
त्रांविततरूपो सौ गृहस्थः साधुरूपकः॥ ॥श्रीशिव उवाच॥ शृणु देवि प्रवक्ष्यामि गृहं ब्रह्माण्डलक्षणं॥ मेरुपर्वतमध्ये तु सर्व
देवाश्रयं प्रिये॥ महाधीरा नदी तत्र मध्यदेशे सदा स्थिता॥ सुमेरोश्चोर्ध्वदेशे तु सप्तलोकं वरानने॥ अधोभागे महेशानि प्रतिष्ठति शिव ४
रसातलं॥ एवं क्रमेण मेरुमध्ये भुवनानि चतुर्दश॥ पातालसप्तकस्योर्द्धे ब्रह्मपद्मं सुरेश्वरि॥ अधोवक्त्रं हि तत्पद्मं धरामध्ये चतुर्दलं॥ प

द्ममध्ये बीजकोषे क्षितिचक्रं मनोहरं॥ वलयाकाररूपेण सप्तद्वीपाः सप्तसंस्थिताः॥ जम्बुद्वीपं मध्यदेशे चतुष्कोणं मनोहरं॥ त्रिकोणं मदनागारं कंदर्प
स्याधिदेवता॥ ऐं क्लीं बीजं हि लरूपं गजेन्द्रवाहनं शिवे॥ त्रिकोणे मदनागारे विष्णुरूपो महेश्वरः॥ माया शक्तिर्महेशानि भुजंगाकाररूपिणी
॥ तथैव वेष्टितं लिंगं सार्द्धत्रिवलयाकृतिः॥ लिंगच्छिद्रस्य वक्त्रेण समाच्छाद्य स्थिता मुदा(?)॥ ऐं क्लीं बीजं वराणां हे लिंगस्य वामदेशके॥ सुमेरुं
त्वसदनं नादोपरि सुसुन्दरं॥ तत्रैव निवसेद्ब्रह्मा सृष्टिकर्त्ता प्रजापतिः॥ वामभागे च सावित्री वेदमाता सुरेश्वरी॥ तस्याः प्रसादमासाद्य सृष्टिं
वितनुते सदा॥ सत्यं पंकजसदनं लक्षयोजनविस्तृतं॥ तस्योर्द्ध्वं परमेशानि क्रमेणैव दाक्ष्यमयोदितं॥ त्रिकोणं परमेशानि द्वित्रिभिः(?) मण्डितं मकोष्ठ
॥ तदेव पर्वतं प्रोक्तं सर्वदेवाश्रयं हितं॥ त्रिकोणमध्ये तत्राहं पश्चात्सर्ववरानने॥ स्थावरं पर्वतं पश्य कीदृशं प्रमन्तृकं(?)॥ खगं न हि
कं देवि नास्ति किं पृथिवीतले॥ त्रिकोणे वा हे गिरिजे पर्वतं वज्ररूपकं॥ नीलाचलं मंदरं च पर्वतं चन्द्रशेखरं॥ हिमालयं सुमेरुं च मल
यं भस्मपर्वतं॥ चतुष्कोणे वसेद्देवि पर्वतं तत्र कैलासं(?)॥ एतेषां शिखरे ज्ञानं पर्वतं वज्ररूपकं॥ नानादेवालयं देवि तथैव दानवालयं
॥ तृणगुल्मलतावल्ली नानारूपाणि तत्र वै॥ पापिष्ठास्तत्र वै जाताः क्रमयोगेन पार्वति॥ ज्ञायते प्रियतेत्र पूर्वोक्तेनैव वर्त्मना॥ ॥इति श्री
निर्वाणतंत्रे योगविवरणं नाम चतुर्थः पटलः॥४॥ ॥श्रीशिव उवाच॥ एतस्य ब्रह्मस्योर्द्ध्वदेशे ... पंकजं शुभं॥ पत्रेषु कंनथा द्

नि.तं. ५

तं चतुर्दशविभूषितं॥ पद्ममध्ये बीजकोषे भुवर्लोकं मनोहरं॥ सिंदूरसदृशं रक्तवर्णेन शोभितं सदा॥ सिंदूरारक्तवस्त्रेण निर्मितं चक्रपाणि
ना॥ तस्योर्द्ध्वे निवसेद्विष्णुः श्रीवाणी वामदक्षिणे॥ ब्रह्माण्डं तत्र लोकः पाल्यते चक्रपाणिना॥ वैकुंठ नाम तत्स्वर्गं नानादेवालयं
हि तत्॥ वैकुंठस्य दक्षभागे गोलोकं सर्वमोहनं॥ तत्रैव राधिका देवी द्विभुजा मुरलीधरा॥ नारदाद्यैर्मुनिगणैः सेवितं वेदपारगैः॥ वैकुंठसदृशं
स्थानं नास्ति ज्ञाने च मामके॥ अत्र मध्ये तथा वासो यथा सर्वं प्रपश्यति॥ तथैव भूमिगाः सर्वे ज्योतिषं परिपश्यति॥ नानाभोगयुताः सर्वे
नानारत्नेन भूषिताः॥ इन्द्राद्या देवताः सर्वे नित्यं तिष्ठन्ति हेतवे॥ महासत्त्वमयं लोकं वेदवाक्यविराजितं॥ पीताम्बरधरं शान्तमूर्त्तिं वनमालाविभू
षितं॥ एवं भक्तजनं सर्वं वैकुंठे वोपशोभितं॥ विष्णुश्चाहं विष्णुगणं वैष्णवं विष्णुरूपकं॥ विष्णुगानं विना नास्ति वैकुंठे परमेश्वरि॥ यद्रूपं
लकं धाम तद्रूपं नास्ति मामके॥ ज्ञाने वा वाक्पुषे किं वा ध्यानयोगे न विद्यते॥ शुद्धसत्त्वमयं देवि नानादेवेन शोभितं॥ तत्रैव भाति कैलास
स्तत्रैव ब्रह्मणः पुरं॥ वैकुंठनगरं तत्र तत्रैव रविराजयं॥ चंद्रालयं हि तत्रैव कंदर्पनिलयं प्रिये॥ सर्वदेवालयं तत्र देवकन्यादिशोभितं॥ मध्यदे शिव ५
शे गोलकाख्यं श्रीविष्णोर्भोगमंदिरं॥ श्रीविष्णोस्स्वरूपस्य यत्स्थलं विज्ञमोहनं॥ तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेधुना॥ यत्रैव सततं भा
ति द्विभुजो मुरलीधरः॥ निराकारो महाविष्णुः साकारो विक्षणेक्षणे॥ यदा साकाररूपो सौ तदैव मुरलीधरः॥ तदा सत्त्वमयो विष्णुर्भवनं पाति नि

त्यं॥ वेलत्वस्य महामोक्षं यत्रैव परमेश्वरि॥ इति स्थानस्य माहात्म्यं संक्षेपेण मयोदितं॥ विस्तरेण न शक्नोमि जन्मांतरशतेन च॥ बीजकोषस्य व
लेन वेष्टितं तोयमंडलं॥ प्रमाणं सुंदरं तोयं यथा क्षीरोदसागरं॥ धुत्तलस्य ज्योतिषाकारं कोटिचन्द्रसमद्युतिः॥ वलयाकाररूपेण सुमुत्पन्ना तोयमंड
लं॥ गंगादिशारिताः सर्वास्तत्रैव भांति सुंदरि॥ इंद्रादिदेवताः सर्वे स्तूयमाना निरंतरं॥ गंधर्वयक्षनागादिक्रीडार्थं वाक्यथा॥ वेदगानेन भासंते
मूर्त्तिमंतस्सदैव हि॥ कालवेनेव रागेन साम गानं सदा प्रिये॥ मल्लारेण षदार्थं वसंतेन तथा पुनः॥ हिंदोलेन यजुःपाठं सदा कुर्वन्ति वेधसः॥ कर्ण
टेनैव कल्पे च श्रीरागेण तथा शिवे॥ निर्दिष्टः पाठमेतत्तु अनिर्दिष्टमतः परं॥ तत्रैव वर्त्तते रागाः सहस्राणि च षोडश॥ तत्रैव भांति तालाश्च सहस्र
णि च षोडश॥ मुरारे मुरली गानात्सर्वे तालाश्च जायते॥ तेन तालेन रागेण सदा गायंति वेधसः॥ तद्रागस्य विभागं हि कुर्वन्ति मुनयो जनाः॥ वसंत
राश्च अस्तेव तिष्ठति तत्र संततं॥ नानाधातुप्रसन्नेन भूषितं मुरलीधरं॥ तत्रैव राधिका देवि नानासुरविलासिनी॥ वदंति मुरलीगानं कृत्वा
तमोहनं॥ येन शब्देन कामस्य उत्पत्तिर्जायते सदा॥ तदा गच्छेव तत्त्वालंकृतगानं प्रयतन्ति॥ एवमानंदसंयुक्ता महावेशविलासिनी॥ वामभागे
सदा भाति राधिका भक्तवत्सला॥ ज्ञार्थनैकं प्रकुर्वन्ती राधिका भक्तिसंयुता॥ ॥श्रीराधिकोवाच॥ तव भक्तियुता सत्या याथवा भक्तिसंयुता गो
लोकस्थं महाविष्णुं द्विभुजं मुरलीधरं॥ सदानिंद्युतं देवं प्रमसंगे विराजितं॥ एवं ध्यायंति ये मर्त्यास्तस्योपायस्तु कीदृशं॥ तद्वदस्व विशेषेण यद्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं. ६

हंसवल्लभा॥ ॥श्रीभगवानुवाच॥ येयथामांभजंत्येवतेनमार्गेणसज्जति॥ दास्यामिष्टएवार्वंगिस्सदात्वंभक्तवत्सला॥ आदौराधांततःकृष्णो
ज्वलंतियेवमानवाः॥ तेषांच्चसज्जतिप्राक्तदास्यामिनात्रसंशयः॥ गुरुणांभावमार्गेणमंत्रमार्गेणचैवहि॥ येजनामांभजंत्येवतेनरामस्तमाः
सदा॥ यानारीमामभेदेनभजतेपुरुषंसदा॥ त्वत्समासासदानारीज्ञायतेनात्रसंशयः॥ भक्त्यावाप्यथवाभक्त्याजलंतियुगलंयदि॥ तत्र
भक्त्याप्रदास्यामिसज्जतिंश्रूणुराधिके॥ ममस्थानेवगच्छंतिकदाचिद्यममंदिरे॥ सत्यंसत्यंपुनःसत्यंसत्यंसत्यंहिराधिके॥ इतिश्रुत्वाचसादे
वीराधिकाप्रेमवत्सला॥ अंकेशेतेमहाविष्णोःकामवाणेनपीडिता॥ विष्णुलोकमिदंदेविचापंश्रूणुयत्नतः॥ ॥इतिनिर्वाणतंत्रेपंचमः
पटलः॥५॥ ॥श्रीशंकरउवाच॥ एतत्पद्मस्योर्द्ध्वदेशेमहापद्मसुदुर्लभं॥ दशपत्रंनीलवर्णंसजलंघनरूपकं॥ तादिफांतैःसवर्णैस्तुपंकजं
वातिशोभितं॥ तन्मध्येवीजकोशेनिवसतिसततंवह्निवीजंसुसिद्धंमवाह्येतत्रैपुरत्वंनवतपननिभंस्वस्तिकंतत्त्रिभागे॥ स्वर्लोकाख्योमि
दंदेविसर्वदेवैःप्रपूजितं॥ साकारंवह्निवीजंचमध्येवमेषवाहनं॥ रुद्रालयंहितत्रैवमहामोहस्यनाशनं॥ भद्रकालीमहाविद्यावामभागे
सुशोभिता॥ भद्रकालीमहाविद्यासदासंहारकारिणी॥ ब्रह्माणःसृजतेलोकःपाल्यतेविष्णुरूपिणा॥ रुद्रदेवोरुद्ररूपःसदासंहारकारकः॥
संहरेद्रुद्ररूपेणभद्रकालिकयासह॥ रुद्रस्यभावनादेविकिंनसिद्ध्यतिचंडिके॥ यद्रूपंकथितंपूर्वंगोलोकंसर्वमोहनं॥ तस्माद्द्वैसर्वतोभावे शिवः ६
रुद्रलोकेचतुर्गुणं॥ रुद्रलोकंमहास्वर्गगोलोकाद्देवतुर्गुणं॥ महामोक्षप्रदंनित्यंरुद्रभक्तागभूषणं॥ भद्रकालीमहाविद्यारुद्रस्यवामदेशा

केविष्णुनापाल्यतेयद्वत्कालीरूपेणभुज्यते॥ अतःकालीमहादेवीसदैवमुरलीधरः॥ आराध्यवाकृयत्नेनवैकुंठाधिपतिर्भवेत्॥ गो
लोकाधिपतिर्देविस्तुतिभक्तिपरायणः॥ कालिकायाःप्रसादेनसभवेत्तत्रलोकपालकः॥ लोकानांरक्षणार्थायसश्रीकोमुरलीधरः॥ स
माराध्यभद्रकालींगोलोकेनिवसेत्सदा॥ प्रसादंकालिकायाश्चभुंजतेविष्णुनासदा॥ अनन्तपालकोविष्णुर्महासत्त्वपरायणः॥ ॥
इतिनिर्वाणतंत्रेषष्ठःपटलः॥६॥ ॥श्रीशंकरउवाच॥ एतत्पद्मस्योर्द्ध्वदेशेविमलंपद्मसुंदरं॥ शोभितंद्वादशैःपत्रैःशोणवर्णंकस
त्प्रभं॥ वांतांतिरिक्तफल्गुदंसुधासिंदूरसोदरं॥ पद्ममध्येवीजकोषेषट्कोणंमंडलंशुभं॥ मंडलस्यमध्यदेशेवायुवीजंमनोहरं॥ सजीवंवायु
वीजंचचेदवाकुविराजितं॥ लोकत्रयस्यईशानंरूपंसर्वपूजितं॥ यादिह्यांदुवनेशानित्रिपुलोकेप्रपूजिता॥ ईश्वरस्यवामभागेसा
देवीपरितिष्ठति॥ महर्लोकमिदंभद्रेपूजास्थानंसुरेश्वरि॥ अत्रैवमानसंध्यानंकुकुरुतेयोगविन्नमः॥ सिंदूरारुणवादीगिस्फटि
केविभितंनतः॥ अनभ्यानवासर्वेज्योतिःपरिपश्यति॥ सर्वाययवसंयुक्तादेवाश्चिंतिसंततं॥ भूमिगाःपरिपश्यंतिचक्राकारंहितेजसं
॥स्वर्लोकगामिनःसर्वेस्वर्गतिष्ठंतिपार्वति॥ भूर्लोकेनिवसेद्ब्रह्माभुवर्लोकेजनार्दनः॥ स्वर्लोकेनिवसेच्छंभुःसदासंहारकारकः॥
ब्रह्मादीनांचईशानःसर्वकर्त्ताचईश्वरः॥ सर्वस्वामीस्वरूपश्चसर्वकर्त्तासुरेश्वरः॥ सृष्टिस्थितिलयादीनांकर्त्ताचपरमेश्वरः॥ गोलो

नि.तं. ७

कंकथितंदेवियद्रूपंशोभितंसदा॥ तस्माच्चतुर्गुणंदेविमहर्लोकंसुसुंदरं॥ विस्तीर्णंचशतगुणंसर्वंशतगुणंशिवे॥ महर्लोकस्यमाहात्म्यंकिं
वक्तुंशक्यतेमया॥ गोलोकस्यशतगुणांसर्वत्रपरमेश्वरि॥ महर्लोकेवसेद्धीदिक्सामान्यभावतत्परः॥ तस्माद्देवशतांशैकंगोलोकंमुरली
धरं॥ तदाज्ञाप्राप्यसहसास्तंजतेपद्मयोनिना॥ तदाज्ञयापातिलोकान्विष्णुर्मोमुरलीधरः॥ एवंहिरुद्ररूपेणसंहरत्यखिलंजगत्॥
सर्वकर्त्तायतोदेविअतःसपरमेश्वरः॥ ईश्वरःसर्वकर्त्ताचनिर्गुणश्चाचलःशिवः॥ भुवनेशीविनादेविस्थितिंनैवशक्यते॥ यंगुणाद्यः
सदाईशोगामित्वंनहिशक्यते॥ भुवनेशीसमाराध्यसर्वस्वामीसईश्वरः॥ अभयवमहेशानित्वयेवमोक्षदायिनी॥ विश्वमातावसादेवी
विश्वमातावसादेवीविश्वपालनकारिणी॥ मोक्षदासर्वलोकानांमुक्तिदाविश्वमातृका॥ भुवनेशीविनाईशःकिंचित्कर्तुंनशक्यते॥ अ
तएवहिसादेवीमोक्षदासर्वरूपिणी॥ इतितेकथितंकिंचित्महर्लोकस्यलक्षणं॥ समासेनपरेशानिग्रंथान[illegible]णसादरं॥ ॥इतिनि
र्वाणतंत्रेसप्तमःपटलः॥७॥ ॥श्रीशंकरउवाच॥ अस्योर्द्ध्वेनिर्मलंपद्मंसर्वमोहनकारणं॥ षोडशैःपत्रकैर्युक्तंमोहांधकारनाशनं॥ धूम्र
मध्येयथावह्निस्तथाज्योतिर्मयंप्रिये॥ पद्ममध्येवराटेचजनलोकंसुसुंदरं॥ महामोहांधसमनंतताहेचन्द्रमंडलं॥ देवहृदेगीयवैथ शिवः ७
मुनिभिःपरिशोभितं॥ गोलोकस्यलक्षगुणमिहस्थानंसुदुर्लभं॥ देवत्वंचमनोज्ञंचविस्तीर्णंचतथापुनः॥ सर्वलक्षगुणंदेविगोलोकान्न

त्रसंशयः॥ वीजकोशेमणिद्वीपेषट्कोणेयंत्रमुत्तमं॥ यंत्रमध्येतुवृषभंमहासिंहार्द्धदेहकं॥ तस्योपरिसदागौरीदक्षभागेसदाशिवः॥ त्रिनेत्रं
पंचवक्त्रंचप्रतिवक्त्रेत्रिलोचनं॥ विभूतिभूषितांगश्चरजतावलसोदरः॥ व्याघ्रचर्मधरोदेवोमणिमालाविभूषितः॥ लोकानामिष्टदाताचलोक
नाभयनाशनः॥ लोकानांमुक्तिजनकोलोकानांज्ञानदायकः॥ आराधकस्यब्रह्मत्वदायकोविष्णुपूजितः॥ सर्वानन्दकरोदेवोअर्द्धना
रीश्वरोविभुः॥ कचिज्ज्योतिर्मयोदेवःकचिदाकारवर्जितः॥ देवानांपूज्यरूपश्चदेवानांस्वामिरूपकः॥ भक्तस्यमुक्तिदोनित्योविष्णुत्वदाय
कःप्रभुः॥ विल्वपत्रैःपूजकस्यनिजत्वायुज्यदायकः॥ गोलोकाधिपतिंहत्वाभक्तंरक्षतियःशिवः॥ तस्यदेवस्यमाहात्म्यंकिंविस्तारेणचंडिके॥
यागौरीलोकमाताचश्रीभोरवींगधारिणी॥ त्रिगुणासामहागौरीगौरीलोकेनविनाकथं॥ तस्याःसंगंसमासाद्यसर्वकर्त्तासदाशिवः॥ ॥इतिनि
र्वाणतंत्रेअष्टमःपटलः॥८॥ ॥श्रीशंकरउवाच॥ एतत्पद्मस्योर्द्ध्वदेशेज्ञानपद्मंसुदुर्लभं॥ पत्रद्वयसमायुक्तंपूर्णचन्द्रस्यमंडलं॥ पद्ममध्ये
वीजकोषेसारेशिताम्रणिपुरी॥ तन्मध्येनवकोणंचयंत्रंपरमदुर्लभं॥ वायुवीजंहितन्मध्येसाकारंहंसरूपिणं॥ हंसपरंब्रह्मरूपःसाकारःशिवरू
पकः॥ तारश्चकूर्वरोहेनिगमागमपक्षवान्॥ शिवशक्तिपदद्वंद्वंविन्दुत्रयविभूषितं॥ विहारश्चास्यहंसस्यओंमयंकजपरिज्ञो॥ एवंहंसमणि
र्हिपेनस्यात्कोडःपरःशिवः॥ वामभागेसिद्धकालीसदानंदस्वरूपिणी॥ तस्याःप्रसादमासाद्यसर्वकर्त्तामहेश्वरः॥ तपोलोकमिदंभद्रेसर्वदेव

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.





CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.





CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं.
१२

तेनरा॥ शृणु देवी प्रवक्ष्यामि कौलिकस्य च लक्षणं॥ यस्मिं देवे यदाचारो निर्दिष्टो मंत्रसाधने॥ तदाचारो विशिष्टो यः कौलिकश्चैव कीर्त्तितः॥ यो
देवाङ्कोगाणपत्ये सौरे वाऽपि सुलोचने॥ तत्वज्ञानमिदं प्रोक्तं वैष्णवे शृणु यत्नतः॥ ॥ इति निर्वाणतंत्रे तत्वज्ञानविवरणं नाम एकादशः पटलः॥
॥११॥ ॥श्रीचंडिकोवाच॥ शृणु नाथ परानन्द मम प्राणेश्वर प्रभो॥ वैष्णवस्य यथा तत्वं तन्मे ब्रूहि जगत्पते॥ ॥श्रीशंकर उवाच॥ शृणु त्वं वरा-
रोहे वैष्णवस्य त्रिलोचने॥ गुरुतत्वं मंत्रतत्वं वर्णतत्वं सुरेश्वरि॥ देवतत्वं ध्यानतत्वं पंचतत्वं वरानने॥ तत्रादौ श्रीगुरोस्तत्वं स्नेहाद्वक्ष्यामि पार्वति॥
सत्तैलं वर्त्तिकायुक्तं देहस्थं ब्रह्मतेजसं॥ गुरुणा मंत्रदानेन तत्स्थं वै दीपितं भवेत्॥ देवता याकृतीर्हि ज्ञो वा द्युत्पद्यते ध्रुवं॥ अनपत्य हितस्यात्म
देवरूपो न संशयः॥ इष्टस्याकृतयधीशं तद्देवरूपक्षरात्मकः॥ तेन वर्णात्मकं देहं जंतोरेव न संशयः॥ मंत्रवर्णे स वर्णेन लीयन्ते परमेश्वरि
॥ वर्णतत्वमिदं देवि मम सर्वस्वयद्भवेत्॥ स्वयं देवो नरान्नो नित्यनिर्मलो देवरूपकः॥ सर्वत्र देवता ध्यायेत् गुल्मलतादिषु॥ ध्यानेन ल
भते सर्वं ध्यानेन विष्णुरूपकः॥ ध्यानेन सिद्धिमाप्नोति विना ध्यानेन सिद्ध्यति॥ इति ते कथितं देवि वैष्णवस्य सुरेश्वरि॥ यज्ज्ञानादम
रत्वं च विष्णुरूपो न संशयः॥ यः कुर्यात् परमेशानि तत्वज्ञानं मयोदितं॥ स्वर्गभागि न तस्यो विष्णुलोके महीयते॥ यादृक्क्रियाजो मर्त्यो मनसा शिवः १२
चिन्तयेत्सदा॥ तेन तेन हि गच्छन्ति कदाऽपि मन्दिरं॥ इति ते कथितं तत्वं वैष्णवस्य सुरेश्वरि॥ यज्ज्ञानादमरत्वं च लभते नात्र संशयः॥ ॥

अज्ञात्वा तन्त्रमार्गं च न भवेद्गुरुराक्षसः॥ अज्ञात्वा तन्त्रमहामंत्रं तत्वज्ञानी भवेद्यदि॥२

इति श्रीनिर्वाणतंत्रे विष्णोस्तत्वकथनं नाम द्वादशः पटलः॥१२॥ ॥श्रीचंडिकोवाच॥ स्थानकं दशार्णं च पूर्वं च कथितं प्रभो॥ प्रकाशं कुरु मे तत्रं क
थयस्व दयानिधे॥ ॥श्रीशंकर उवाच॥ शृणु देवि प्रवक्ष्यामि मंत्रं दशाक्षरं परं॥ यस्य श्रवणमात्रेण मूढोऽपि विष्णुरूपकः॥ पुंमंत्रोऽपि च देवेशि स्त्रि
मंत्रं जपेद्यदि॥ तथापि नरकं गच्छेदिति देवस्य सम्मतं॥ शृणु देवि प्रवक्ष्यामि दशार्णं मंत्रमुत्तमं॥ मायाबीजं वधूबीजं लक्ष्मीकालीं च पाश
शकं॥ गगनं पृथिवीं चैव वह्निकान्तां ततः प्रिये॥ इति ते कथितं चण्डि दशाक्षरमनूत्तमं॥ यज्ज्ञानादमरत्वं च लभे नात्र संशयः॥ अस्य ग्रह
णमात्रेण नरो नारायणो भवेत्॥ अस्य प्रसादमात्रेण चण्डि निर्वाणतां व्रजेत्॥ दण्डी परिजपेदेतद् दशार्णं परमेश्वरि॥ अस्य मंत्रस्य ग्रह
मंत्राज्ञायन्ते नात्र संशयः॥ सर्वे देवास्सदा रत्नदशार्णं ज्ञायते ध्रुवं॥ महाविद्योपासकस्य दशार्णं नहि पश्यति॥ इह लोके दरिद्रश्च परे च
ब्रह्मराक्षसः॥ तस्माद्यत्नेन देवेशि दशार्णं श्रावयेद्गुरुः॥ केवलं श्रवणं कुर्यात् न जपेत् साधकोत्तमः॥ यः श्रावयेद्दशार्णं च स नरो गुरुरुत्त
मः॥ मंत्रदाता यथा देवि तथैव सद्गुरुः स्मृतः॥ दशार्णदाता यो देवि स एव परमो गुरुः॥ यथा सरित्सु गंगा न समा सकलापगा॥ दशार्णस्य समो
नास्ति मंत्रो त्रिभुवने जिते॥ स्त्रीणां मायादि नारीव यत्सम पुरुषोऽस्ति च॥ दशार्णस्य समो नास्ति मंत्रो हि कथ्यते मया॥ दशकालस्य स्वर्णस्य मु
द्रा लोहमिति वेत्ति॥ दशार्णस्य समं मंत्रं कथयेयु त्वदा प्रिये॥ श्रीप्रसादी हि यं मंत्रो दशार्णः परमेश्वरि॥ कुर्यान्न्याये महातंत्रे माहात्म्यं

नि.तं.
१३

कथयामि ते॥ अतः परं प्रवक्ष्यामि यद्रूपं दंडधारणं॥ साधुरूपो गृहस्थश्च ब्राह्मणो ब्रह्मवादिनः॥ सर्वोपायपरित्यक्तः सदा धर्मपरायणः॥ जितेन्द्रियो विजि
तक्रोधः समत्वं सर्वजातिषु॥ पुत्रे रिपौ समं तत्वं समं सर्वत्र पार्थिवे॥ दयाभावश्च सर्वत्र पुत्रे मित्रे रिपौ भवेत्॥ लाभालाभे जये नाशे निन्दायां पीडिते
तथा॥ कायेप्राणे न संदेहः सुमार्गस्थ गुणान्विते॥ ब्रह्मज्ञानं विना ज्ञानं यस्य चित्ते न विद्यते॥ संन्यासधर्मनिष्ठे वनान्यस्य सुरपूजिते॥ संन्यासधारणं का
र्यं विप्रस्य मुक्तिहेतवे॥ यो विप्रो धारयेद्दंडं सैव नारायणः स्वयं॥ चतुर्भुजः प्रजायेत दंडधारणमात्रतः॥ सर्वलक्षणयुक्तो ब्राह्मणो गमनं चरेत्॥ गत्वा
च दंडिनं दृष्ट्वा प्रणमेत् दंडवत् क्षितौ॥ त्वमेव देव देवेश त्वमेव त्राणकारकः॥ त्वमेव जगतां बंधुस्त्राहि मां शरणागतं॥ इति श्रुत्वा दंडधारी प्रसन्नवदनो जन
नं॥ कलं कस्य सुतस्त्वं हि कथमागमनं वद॥ श्रुत्वा तद्वचनं विप्रः प्रोवाच नमितो वदन्॥ विप्रवंशे समुद्भूतो ह्युक्तो हं विवेकवान्॥ नाम्ना मे पितरौ सा
धातना निये स्त्री सुतादयः॥ मृतौ च माता पितरौ मृता भ्रात्रादयः सुताः॥ प्रभास्य कान्ता नारीनु हे मेघनन्तापवान्॥ अतएव च भो स्वामिन् देहि मे पर
मां गतिं॥ तस्य कुरु द्विजश्रेष्ठ यदुक्तं वै समाहिते॥ मिथ्याभाषणदोषेण ब्राह्मणो विवर्जितः॥ भवत्येव न संदेहो द्विजमतु स्तोत्रदं॥ स्त्रिनायां यो व
नायाश्चाकान्तायां परमेश्वरि॥ सर्वहि विफलं तस्य यः कुर्याद्दंडधारणं॥ पितरौ विद्यते देवि यः कुर्याद्दंडधारणं॥ विद्यते च बालभावो यस्य कान्ता शिवः १३
सुतस्तथा॥ संन्यासधारणं तस्य वृथा हि परमेश्वरि॥ स गुरुश्चाविशिष्यश्च रौरवं प्रगच्छति॥ इत्यादि दृष्ट्वा वाक्यमनुश्रुत्वा दंडी जितेन्द्रियः॥ संन्यास

दानं तस्मै वदध्यानुकीर्त्तमसाध्वनी॥ आदौ दशाक्षरं मंत्रं प्रथमं श्रावयेद् गुरुः॥ [illegible] तावन्महावाक्यमनंकारयेत्ततः॥ क्रोधं वा अक्रोधं वा गुरुं वा
वेशेन गमनं चरेत्॥ गुरुणा सह शिष्येण पृष्ठे पृष्ठे विधानतः॥ शिष्यान् तिष्ठति पुष्पमहावाक्येन मां [illegible]॥ शिष्यः परमहंसतत्वमो ना
स्मि श्रुतो॥ त्वं तत्पदपदार्थमेव हि विष्णुः स्वरूपधृक्॥ त्वमेव जगतां बन्धुस्त्वमेव सर्वपूजितः॥ त्वमेव परमो हंस इति तत्पदमुच्यते॥ स शिष्यं दंडिना
दे विद्वितिका कांत्र देयत ततः॥ अतः सः परमो हंसः पृथिव्यां प्रमोदितः॥ तस्मै वदशीनाथा यदा नारीक्ष सदेवताः॥ सक्रीडाः सपरिवारस्था यान्ति दिवि पाद
कृत्वा॥ पतत्यस्मिन् समये दंडी ध्यानयेत् शिष्यमुत्तमं॥ हुंकारं च हवो दत्वा मंत्रेण तेन गुह्यते॥ हुंकारैर्वायुयोगे युगपत्प्राणं प्रयोजयेत्॥ जन्म
न्तरकृतस्यैव तत्क्षणे जायते किल॥ जन्मान्तरं समालोक्य संस्कारमाचरेत् गुरुः॥ कुंडो विके समानीय अन्नप्राशनमाचरेत्॥ अमुकस्य समा
प्यपुण्यं च नौ विनिक्षिपेत्॥ इति नाम्ना तु संस्थाप्य महासंस्कारमारभेत्॥ ततोपि दंडिना देवि शिष्याय ज्ञानहेतवे॥ गुरुशिष्यमहाधीरमपा
कां हृदयं कुरु॥ जन्मान्तरं तु तस्यैव पृथिव्यां नाधिकारिता॥ भूतदेहस्वरूपो यं यावतीत्यं न संशयः॥ विरतो भवसर्वत्र तोयाया हास्यैव या॥ ब्रा
ह्मणैश्चैव यद्दत्तं तस्याश्वभोजनं तथा॥ पंचतत्वं सदा शेषं गुणभावे जितेन्द्रियः॥ सदैव मानसी पूजां सदा मानं तर्पणं॥ त्रिसंध्यं मानसं यागं नाभिकुं
डे प्रयत्नतः॥ स देवमानसं भोगं त्यागं कुरु प्रयत्नतः॥ षड्वर्गयुक्तिनो भूत्वा नरो नारायणः स्वयं॥ भवत्येव न संदेहो दंडधारणमात्रतः॥ चितं चेत्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं. १४

सप्तदशमात्रवंशोऽत्र षोडश॥ कांतायाः सप्तमध्ये वै लक्ष्मीनारायणो भवेत्॥ इति श्रुत्वा वचस्तस्य शिष्यश्चैतानब्रवीद्वचः॥ यदुक्तं मयि सुरूपं येन
न करोमि निरन्तरं॥ पंचतत्त्वं सदा सेवं कस्मात्त्वां भंवदस्व मे॥ यद्वै वर्त्तते दंडी वक्रशिष्यसमाहृतः॥ तत्र गत्वा प्रयत्नेन पंचतत्त्वविचेष्टया॥ अथवा
वीरमध्ये तु यत्नेन गमनं चरेत्॥ तत्त्वज्ञानिगृहस्थस्य सन्निधाने व्रजेत्किल॥ सूद्रम विगं तत्र यत्रास्ते कुलनायकः॥ भिक्षाचर्यां न चरेत्सार्थदे
वनाद्याः कृते पुनः॥ आचार्यपत्नीं दृष्ट्वा तु भिक्षां कुर्यात्समाहितः॥ हे मातर्देहि मे भिक्षां कुंडलीतर्पणाय महं॥ एवमुक्त्वा ततो दंडी महासस्या
रमाचरेत्॥ कुंडाग्निकं समानीय होमयेद्विधिपूर्वकं॥ ततो ऽज्ञेन करं धृत्वा आज्ञे रष्टाङ्गतीपुनः॥ विपरीतक्रमेणैव कुर्याद्दंडविशोधनं॥ ततः
कुर्यात्प्रयत्नेन अन्तर्यज्ञोपवीतकं॥ शिखान्तेस्य शिखां मंत्रैः पूगमध्ये विनिक्षिपेत्॥ घृतमृत्तिकया पूगं विलिप्य शोधयेत्ततः॥ ततः पूगं मूलमं
त्रे दंडमध्ये विनिःक्षिपेत्॥ पूर्णाहुतिं ततो दद्यात्तत्सूत्रमानयेत्सुधीः॥ यज्ञसूत्रं सशिखायां ततः पूगं शोधयेत्प्रिये॥ मूलमंत्रं जपेत्तत्र गंगाजले कस
हस्रकं॥ तत्र स्थापयेन्मंत्रं कालिकायाश्च सुन्दरि॥ अथवा स्थापयेन्मंत्रं नारायण्याः परमदुर्लभं॥ मूलमंत्रं समुच्चार्य पूगभस्म प्रयत्नतः॥ भक्षणं
तत्क्षणात्सा तु दंडी यज्ञोपवीतवान्॥ भवत्येव न संदेहो नरो नारायणो भवेत्॥ बिल्वदंडं समानीय वंशस्यैकं समानयेत्॥ बिल्वदंडे कालिका शिव १४
माजपेन्मंत्रं प्रयत्नतः॥ जीवन्यासं ततः कृत्वा दंडो देवी विचिन्तयेत्॥ बिल्वस्थितं च वै तत्त्वं वंशदंडे नियोजयेत्॥ इष्टदेवीस्वरूपेण दं

मूलेन यज्ञसूत्रं तु तस्मिन्नेव निवेशयेत्॥५

न्यसेत्२

डोयं परमेश्वरि॥ शिष्यस्य दक्षिणे हस्ते दंडस्य स्थानमाचरेत्॥ कमंडलुं समानीय वामहस्ते प्रपूजयेत्॥ वामहस्ते निक्षिपेत्तत्र मूलमंत्रं ततो ज
पेत्॥ अष्टोत्तरशतं जप्त्वा तस्य वामकरे न्यसेत्॥ गैरिकं कौपिनं वस्त्रं येन परिधापयेत्॥ दंडधारणमात्रेण नरो नारायणो भवेत्॥ अथवा विधिमहा
मायां दंडोपरि विभावय॥ गुरुः पुत्रं महाकालीं दंडोपरि विभावयेत्॥ साक्षान्नारायणस्त्वं हि दयाधर्मपरो भव॥ तव माता पिता वापि सर्वं दंडाग्निकोपि
तं॥ घोरं च कर्म न कुर्वीत गृहस्थस्य द्विजस्य वा॥ नारायणं सदा भाष्य द्वारे तस्य व्रजेत्सुधीः॥ इति श्रुत्वा गृहस्थश्च पुटाञ्जलिपरो भवेत्॥ द्वारे च दंडिनं दृ
ष्ट्वा प्रणमेद्ब्राह्मणो नरः॥ भिक्षां दद्यात्प्रयत्नेन कुर्मं मां सविता प्रिये॥ आदाय भिक्षां देवेशि घोरं च कर्म न चरेत्॥ तथा हि नगरं गत्वा त्रिरात्रं व
सतिं चरेत्॥ तीर्थभूमिं ततो गत्वा पंचरात्रं वसेत्ततः॥ ब्राह्मणो दंडिनं दृष्ट्वा प्रणमेद्विधिपूर्वकं॥ तोयपूर्णं च देवेशि किंवा पूर्णकमंडलुं॥ दरिद्रावेण तत्पा
त्रं पूर्णं तोयं भवेद्ध्रुवं॥ दद्यान्न यदि मोहेन स भवेदापदाश्रयं॥ त्रिंशद्वर्षसहस्राणि वने च विट्पो भवेत्॥ इति ते कथितं चंडि संन्यासधारणं परं॥ पाखंड
यत्न वक्तव्यं प्राणान्तेपि कदाचन॥ ॥इति निर्वाणतंत्रे चंडिशंकरसंवादे त्रयोदशपटलः॥१३॥ ॥श्रीशंकर उवाच॥ शृणु देवि प्रवक्ष्यामि अ
वधूतो यथा भवेत्॥ वीरस्य मूर्त्तिं ज्ञानीयात् सदा तत्त्वपरायणं॥ यद्रूपं कथितं पूर्वं संन्यासधारणं परं॥ तद्रूपं सर्वकर्माणि कुर्याद्वीरवल्लभः॥ दं
डं त्यक्त्वा मुंडनं देवि आवश्यकं समाचरेत्॥ यथा तथा नैव कुर्याद्देवीयस्य च मुंडनं॥ असंस्कृतं च केशानां मुंडने क्षि कुचो ग्रयां॥ अस्थिमालाविभूषितां

नि.तं. १५

रुद्राक्षान्वापि धारयेत्॥ दिगम्बरो वा वीरेन्द्र अथवा कौपिनी भवेत्॥ रक्तचन्दनदिग्धांगः कुर्याद्भस्मांगभूषणं॥ क्षमादानं तपो ध्यानं वीरभावेन
शैलजे॥ शिवोहं भैरवानन्दो मुक्तोहं कुलनायकः॥ एवं भावपरो मंत्री हेतुयुक्तः सदा भवेत्॥ सन्निधाने वनं कुर्यात्तत्सदा कारणसेवनं॥ भवेत्साक्षा
त्पुरुषः साधु रूपो न संशयः॥ निर्वाणमुक्तिमाप्नोति ब्राह्मणो वीरभावतः॥ अवधूतक्षत्रियश्च महायोगी न संशयः॥ स्वरूपो विभवे वैश्यः शूद्रो वि
सहलोकभाक्॥ संपूर्णफलमाप्नोति विप्रो निर्वाणतां व्रजेत्॥ त्रिभागफलमाप्नोति क्षत्रियो वीरभावतः॥ पादद्वयं तु वैश्यस्य शूद्रस्यैव कपाद्ध
॥ ब्राह्मणस्य विनान्यत्र संन्यासो नास्ति चंडिके॥ कुर्यान्मोहनयोगात्र शेषं व पापाश्रयो नरः॥ गुप्तभावेन देवेशि शृणुयान्प्राणवल्लभे॥ संन्यासि
नां सदा सेव्यं पंचतत्त्वं वरानने॥ द्वादशाहे तु देवेशि यदि शूद्रो न जायते॥ सेवयानन्दविख्यातो द्वादशाहे स रक्षति॥ अवधूतस्य चाख्यातः स्मृ
णश्च पर्वतात्यजे॥ वनारण्ये भारती च पुरी च गिरिरेव च॥ एकस्थाने च संस्थित्वा इष्टध्यानादिकं चरेत्॥ यो मंत्रं न प्रकाशाङ्गः शरणः परिकीर्ति
तः॥ श्रेष्ठकैःसोज दानूढः सदा व लवतत्त्व चरेत्॥ अन्तर्योगी महावीरो हरास्सेवः शैलजे॥ नानाशास्त्रेषु यो विज्ञो नानाकर्मविशारदः॥ सर्व शिवः १५
इष्टदेवीभावेन भावयेद्यो रागणं॥ स एव भारते वीरो महाज्ञानी जितेन्द्रियः॥ सदोर्द्ध्वा कुर्योवीरो मुक्तकेशो दिगम्बरः॥ स एव परमभावेनमा
वयेच्छो नरोत्तमः॥ इष्टदेवीं विना नास्ति शावीरः परिकीर्त्तितः॥ नानादेवेषु पीठेषु क्षेत्रेषु तीर्थभूमिषु॥ भ्रमणं कुरुते नित्यं कुर्याद्यत्नेन प्र

नि.तं. १६

जनं॥ देवतायाः सदा ध्यानं श्रीगुरोः पूजनं तथा॥ अन्तर्यागेन यो निष्ठः स वीरः पुरि रेवच॥ अवधूताश्रमो देवि यस्य भक्तिः सुनिश्चला॥ तस्य तु
ष्टा भवेत्काली किं न सिध्यति भूतले॥ अवधूतं समालोक्य शंभुवत्पूजनं चरेत्॥ शक्तितः पंचतत्त्वानि यत्नेन च निवेदयेत्॥ पंचतत्त्ववि
नाभेदे आनन्दो नैव जायते॥ अतो हि भक्तिभावेन तेनैव पूजनं चरेत्॥ इति ते कथितं काले अवधूतस्य लक्षणं॥ येन विज्ञानमात्रेण शिव
त्वं लभते नरः॥ श्रद्धायभक्तिहीनाय न दातव्यं कदाचन॥ गुरुभक्तिविहीनाय तत्त्वनिन्दापराय च॥ इदं तंत्रं सुगुप्तं च प्राणान्तेपि कदाचन॥
न श्रावयेद भक्ताय सिद्धिहानिः प्रजायते॥ कदाचिद्वा स्वपुत्राय स्वशिष्याय महात्मने॥ श्रावयेद्भक्तियुक्ताय यदि तद्योग्यता भवेत्॥ अतः
गोपय यत्नेन स्वयोनिमिव शैलजे॥ संक्षेपात्कथितं किंचित्किमन्यच्छ्रोतुमिच्छसि॥ ॥इति श्रीनिर्वाणतंत्रे चंडिकाशंकरसंवादे अ
वधूताश्रमविवरणं नाम चतुर्दशः पटलः समाप्तः॥१४॥ ॥सम्वत् १९०० साल मिति वैशाख सुदि १ रोज १ जो गजरसिंचो याऽकर्॥

शिवः १६

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निर्वाणतन्त्रका मातृका 'घ'का प्रतिलिपिहरू


१.५६९१२ श्रीराष्ट्रिय अभिलेखालय
नेपाल
विषयः शैवतन्त्र
पुस्तक नामः निर्वाणतन्त्र
ल. सं. न्न १
त्रि. सं. ५५२
पत्र सं: २५
आकार १० X २२

NATONAL ARCHIVES
NEPAL
Subject:
Mansccript-Name:
C. No.
S. No.
Folio. No.
Size.




नि.तं. १ श्रीगणेशाय नमः॥ ॥कैलासपर्वते रम्ये नानारत्नोपशोभिते॥ विपरीतरताशक्ता चंडी
पप्रच्छ शंकरम्॥ श्रीचंडिकोवाच॥ निराकारं निर्गुणञ्च स्तुतिनिन्दाविवर्जितं॥ कुतिस्त्वं सर्व
कर्त्तारं वर्णातीतं सुनिश्चितं॥ सेशादिरहितं शान्तं किमाकारं प्रनिष्ठितं॥ तस्मादुत्पत्ति देवे-
श किमाकारेण नाथ त्वं॥ श्रीशंकर उवाच॥ शृणु देवी परं तत्त्वं वर्णातीतं च वक्ष्यामि गुणा
त्ययं गुणातीतं स्तुतिनिन्दाविवर्जितं॥ आकारं हि शिवं नित्यं यस्मादागादि वर्जितं॥ प्रज राम: १
नार्थाय देवेशि स्वयमुत्पत्तिकारिणी॥ येन रूपेण ब्रह्माण्डे जायते भुज्यते त्वं शिवे॥ आ
काशाज्जायते वायु वायोरुत्पद्यते रविः॥ रवेरुत्पद्यते तोयं तोयादुत्पद्यते मही॥ पं
चभूतेश्च ब्रह्माण्डं भवद्भिः पर्वतालये॥ ब्रह्माण्डस्थापनार्थाय कुर्मपृष्ठे स्थितः
कः॥ तन्मूर्द्ध्नि वासुकाकारे ब्रह्माण्डे बहवः स्थिताः॥ कारणं च वारिमध्ये कुर्मेश्वर

तिनिस्पृशः॥ अहमेव त्रिशूलेन पालयामि पुनः पुनः॥ श्रीचंडिकोवाच॥ किमाकारं
तु ब्रह्माण्डं तन्मे ब्रूहि महेश्वर॥ सृष्टिप्रकारं तन्मध्ये किमाकारं हि तत्त्ववित्॥ श्रीशंक
र उवाच॥ यंत्राकारं तु ब्रह्माण्डं नानाविग्रहपार्वति॥ ब्रह्माण्डविग्रहं प्रोक्तं स्थूलसू
क्ष्मादिकं हि यत्॥ मेरुस्तन्मध्यके देवि तथा सप्तकुलाचलाः॥ भूलादिसप्तकान्तं वै सु
मेरुर्नामपर्वतः॥ स्थितं मेरोरधोभागे ह्यंगुल्यावाधि देशतः॥ भूर्लोकादि महेशानि स
प्तस्वर्गं क्रमेण हि॥ अंगुल्या सप्तपातालं तिष्ठन्ति परमेश्वरि॥ सप्तलोके निराकारं
महाज्योतिस्वरूपिणी॥ मायया छादितात्मानं चंपकाकाररूपिणी॥ हस्तपादादिर
हितां वह्निसूर्याग्निरूपिणी॥ माया बंधनं संत्यज्य द्विधाभिन्ना यदा सुखी॥ शिवशा
क्तिविभागेन जायते सृष्टिकल्पना॥ प्रथमे जायते ब्रह्मा ब्रह्माणं संमोहयावति॥ श्रीका

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि॰तं॰ २ लिकोवाच॥ शृणु पुत्र महावीर विवाहं कुरु यत्नतः॥ एतच्छ्रुत्वा ततो ब्रह्मा उवाच वचनं हरं
प्रिये॥ त्वां विना जननी नास्ति शक्तिर्मे दीयतां हरि॥ न शक्नुत्वा जगतां गाता स्वदेहान्मोहि
नीं ददौ॥ द्वितीया सा महाविद्या सावित्री परमा कला॥ अस्याः संगं समासाद्य वेदविस्त
रणं कुरु॥ अनायासेन सृष्टिकर्ता भवत्वं महिमण्डले॥ द्वितीये जायते पुत्रो विष्णुः सत्व
गुणाश्रयः॥ शृणु पुत्र महावीर विवाहं कुरु यत्नतः॥ तव दर्शनमात्रेण निष्कामो जाय राम॰ २
ते पुमान्॥ सत्यं करोमि हे मातः मोहिनीं देहि मे शिवे॥ देहान्निष्कासितं विनिष्क्रान्त देहे न
स्वैव कालिका॥ वैष्णवी नाम महाविद्या श्रीविद्या परमेश्वरि॥ तामाश्रित्य महाविष्णुः पा
लयं स्परिविलं जगत्॥ तृतीये जायते पुत्रो महायोगी सदाशिवः॥ तं दृष्ट्वा सा महाका
ली तुष्टिपुष्टि प्रभवन्मुदा॥ शृणु पुत्र महायोगिन् महाकामं हृदये कुरु॥ त्वां विना पुरुषः

कोवा मां विना कापि मोहिनी॥ अतस्त्वं परमानंद विवाहं कुरु मे शिव॥ यद्युक्तमपि हे मा
तस्त्वां विना नास्ति मोहिनी॥ सत्यमेतज्जगन्मातर्मां विना पुरुषो न च॥ अस्मिन्देहे स्थि
ते चन्न करोमि विवाहकं॥ कुरु देहान्तरं मातः करुणा यदि वर्तते॥ तच्छ्रुत्वा सा महाकाली
हृद्भोभुवनसुन्दरी॥ आदिभूता यथा काली तथा भुवनसुन्दरी॥ तामाश्रित्य महायोगी संह
रत्यखिलं जगत्॥ ब्रह्मरुद्रविभागश्च शक्तिश्चाष्टविधा भवेत्॥ कालिकायां महाविद्या
यानेन परमेश्वरि॥ इति ते कथितं कान्ते यथा ब्रह्मनिरूपणं॥ गोपनीयं प्रयत्नेन विद्यो
त्पत्तिर्यथा प्रिये॥ १॥ इति चण्डिकाशंकरसंवादे निर्वाणतंत्रे प्रथमः पटलः॥ १॥ ॥
श्रीचण्डिकोवाच॥ त्वत्प्रसादान्महादेव श्रुतं ब्रह्मनिरूपणं॥ इदानीं श्रोतुमिच्छामि सृष्टि
लोकस्थितिर्यथा भवेत्॥ श्रीशिव उवाच॥ शृणु देवि प्रवक्ष्यामि यथा सृष्टिः प्रजायते॥ स

नि॰तं॰ ३ त्यलोके महाकाली महारुद्रेण संयुता॥ चंपकाकृतिविस्तारा चन्द्रसूर्याग्निरूपका॥ अ
नादिपुरुषयुक्ता तद्देहे जीवसंज्ञका॥ ज्वलदग्नेर्यथा देवि स्फुरन्ति विस्फुलिंगकाः॥ तस्मा
च्छुतपरं बिंदु यदा भूमौ पतन्त्यपि॥ तदेव सहसा देवि संगाद्भूतो भवत्यपि॥ स्थावरादिषु की
टेषु पशुपक्षिषु शैलजे॥ चतुराशीतिलक्षेषु जन्म चाप्नोति सो ध्रुवं॥ ततो लभेत्सौ शानैः
मानुष्यं दुर्लभं ततः॥ यतो मानुषदेहस्तु धर्माधर्माधिपः स्मृतः॥ ततोपि लभते जन्म पुनर्ग
र्भं च पाचयात्॥ जायते म्रियते चैव कर्मपाशान्तु निश्चयः॥ चतुराशीतिलक्षेषु नानायोनिषु राम॰ ३
शैलजे॥ श्रीचण्डिकोवाच॥ कथं वा लभते जन्म कथं गर्भं विनश्यति॥ तत्प्रकारं महादेव श्रो
तुमिच्छामि तत्वतः॥ श्रीशंकर उवाच॥ इह यत्क्रियते कर्म तन्मे वै चोपभुज्यते॥ जीवस्त्वेषः
जलौकेव देहाद्देहान्तरं व्रजेत्॥ संप्राप्य वा परं देहं देहं त्यजति पूर्वकं॥ इति श्रुत्वा वसा वरं॥

पञ्च षट्पञ्चमेश्वरि॥ प्राप्नोति तं देहं तु पिण्डदानादिकं कथं॥ शृणु देवि प्रवक्ष्यामि
मायादेहं तदेव हि॥ मायादेहः परेशानि वायुरूपो न चान्यथा॥ वायुरूपापन्नो दे
ह आकाशस्थो निराश्रयः॥ अतश्च पिण्डदानेन वायुस्थिरतरो भवेत्॥ प्रथमं मस्त
कं देवि जायते च क्रमावधि॥ ततो यमपुरं गत्वा धर्माधर्मादिकं हि यत्॥ तद्भुक्त्वा
चापरे किंचित् यदि कर्म न विद्यते॥ यमात्तया तदा जीवः प्रयाणो ब्रह्मसाधनं॥ तस्मा
त्कर्मानुसारेण यदि स्यात् दुर्लभं ततः॥ महाविद्याभावप्राप्त्या ब्रह्मप्राप्ति परं गुरुः॥
तत्व ज्ञानं महेशानि यदि भागवशाद्भवेत्॥ तदेव परमं मोक्षं यावद्ब्रह्मोऽहं इति धा
रणां स्व महामोक्षं सायुज्यं सप्तधा यथा च॥ सारूप्यं चोपजानस्व च सांसमं लोकके॥
महाविद्याप्रसादेन पुनरागमनं न हि॥ अहं ब्रह्मोऽहमेव सर्वमोक्षं यदा शिवे॥ न स

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं. ४
सर्वस्य निर्वाणं भवत्येव न संशयः॥ श्रीचण्डिकोवाच॥ ब्रह्माण्डवाह्येतु किं तु नः पर
मेश्वर॥ तत्सर्वं श्रोतुमिच्छामि यदि स्नेहोस्ति मां प्रति॥ श्रीशंकर उवाच॥ ब्रह्माण्डस्य वा
ह्यदेशे ब्रह्माण्डा बहवः स्थिताः॥ अनंतस्य प्रमाणं तु किं वक्तुं शक्यते मया॥ साऽऽएव निर्मि
तं सर्वं सैव सर्वं सुरेश्वरि॥ ४२॥ इति श्रीचण्डिकाशंकरसंवादे निर्वाणतंत्रे द्वितीयः पट
लः॥ २॥ ॥ श्रीशिव उवाच॥ प्रकृत्या जायते पुंसां प्रकृत्यास्तु पते जगत्॥ तोयाद्बुद्बु रामः
दं देवि यथा तोये विलीयते॥ प्रकृत्या जायते सर्वं पुनस्तस्यां विलीयते॥ तस्मात्प्रकृति ४
योगेन जायते नान्यथा क्वचित्॥ ब्रह्मविष्णुशिवे देवि प्रकृत्या जायते ध्रुवं॥ तथा प्रलय
काले तु प्रकृत्या लुप्यते पुनः॥ शाक्ताश्च वह्निजाः सर्वे नेशो वा नवैष्णवाः॥ उपासनीय
तो देवीं गायत्रीं परमाक्षरीं॥ गायत्रीं शृणु चार्वंगि चतुर्वेदप्रपूजितां॥ वेदमातेति वि

ख्यातां त्रिवर्गफलदायिनीं॥ हालाहलं समुद्धृत्य नाम्याक्षरं समुद्धरेत्॥ वामकर्णसमा
युक्तं पुनर्नाभिं समुद्धरेत्॥ कर्णायुक्तं मूर्द्धरेफं ततश्चतुरवंदिते॥ वारुणं च समायुक्तं च
द्रवीजं ततः परं॥ नादयुक्तं खगयुतं चैकं व्याहृति समुद्धरेत्॥ तत्सं चास समुद्धृत्य सवितु
स्तदनंतरं॥ वरेण्यमिति चोच्चार्य भर्गो देवस्य धीमहि॥ धियोयोनः प्रचोदयात्॥ प्र
णवं तदनंतरं॥ ततश्चाधीत गायत्रीं प्रणवं तदनंतरं॥ इति जप्त्वा महेशानि साक्षाद्ब्रा
ह्मणो भवेत्॥ धियो यो मध्यभागे च यकारद्वयमेव च॥ तन्त्रं तत्र महादेवि अनंतश्रुति
मेव च॥ इति जप्त्वा महेशानि मुक्तो भवति तत्क्षणात्॥ अंत्ययकारयोः स्थाने योकारद्वयमिति
यः पठेत्॥ स चाण्डाल इति ख्यातो ब्रह्महत्यादिने दिने॥ अत एव महेशानि तत्र स्नेहात्प्रकार
श्चितं॥ सावित्री परमा विद्या त्रैलोक्येषु च दुर्लभा॥ अस्याश्च हरणमात्रेण भूपूजा नात्र संश

नि.तं. ५
यः॥ अंगन्यासस्य मंत्रस्य तच्छृणुष्व प्रियंवदे॥ प्रणवद्वयं हृत्पद्मे भूकारं त्रीं शिरदे
शाके॥ भुवः शिखायां स्वकारं कवचे विन्यसेत्सुधीः॥ नेत्रत्रये भूर्भुवः स्वः स्वः का
रं करसम्पुटके॥ नमः स्वाहा वषट् हुं वौषट् फट् च क्रमतो न्यसेत्॥ ध्यानं शृणु वरा
रोहे यथा ध्यात्वा यजेन्नरः॥ श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा॥ श्वेतैर्विलेपनैः
पुष्पैरलंकारैश्च भूषिता॥ आदित्यमण्डलांतःस्था ब्रह्मलोकगताथवा॥ अक्षसूत्रध रामः
रा देवी पद्मासनगताथवा॥ ॥ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवा ५
नां गायत्री एकपदी द्विपदी त्रिपदी चतुष्पद्यपदः॥ नमस्ते तुरीयाय दर्शताय पदाय प
रो रजसे॥ एवं ध्यात्वा यजेद्देवीं गायत्रीं परमाक्षरीं॥ पुनर्ध्यात्वा यंत्रपीठपुष्पे द्वाह्
रानने॥ आदौ त्रिकोणं विन्यस्य षट्कोणं तद्बहिर्न्यसेत्॥ वृत्तं चाष्टदलं पद्मं तद्बहि

श्चतुरस्रकं॥ चतुर्द्वारसमायुक्तं सावित्रीयंत्रमीरितं॥ जीवन्यासादिकं कृत्वा पूजये
त्तां त्रिवर्गदां॥ हालाहलादिकं मंत्रं समस्तं परमेश्वरि॥ समुच्चार्य वदेत्पाद्यं साक्षी
ते पुतां ततः स्नागात्मकमनुः पश्चात् यथाविभवविस्तरैः॥ पूजयेद्दक्षयत्नेन वा
न्यथा ब्रह्मणः स्मृतः॥ द्रव्याभाववरारोहे पाद्यार्घ्यैरुदकात्मकैः॥ पूजयित्वा यजे
द्देवीं गायत्रीं परमाक्षरीं॥ दशभिर्जन्मजनितं सतं न च पुराकृतं॥ त्रियुगं तु सहस्रे
ण गायत्री हंति पातकं॥ महेशा वदतो मन्त्रा वित्सो हृदयस्थितो॥ प्रणवसंप
त्तु जाता गच्छ देवि यथेच्छया॥ इति मंत्रं समुच्चार्य देवीं वामकरे तु धः॥ समर्पयेज्ज
पफलं ततः स्तोत्रादिकं पठेत्॥ विधिवच्च जपं जप्त्वा पुरश्चरणमीरितं॥ तद्दशांशं ज
नेपश्चात्पुरश्चरणसिद्धये॥ होमस्य तु दशांशेन तर्पणं तदनंतरं॥ तर्पणस्य दशां

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं. ६

शोकमभिषेकं ततः परं॥ अभिषेकदशांशेकं कुर्यात्क्षालनभोजनं॥ ततः सिद्धा भ
वेद्देवी त्रिवर्गफलसाधिनी॥ माहात्म्यं चास्य मंत्रस्य चतुर्वेदेन भाषितं॥ अपिमा
र्जनमंत्रस्य प्रकारं शृणु यत्नतः॥ भूमौ शिरसि चाकाशे आकाशे भुवि मस्तके
॥ मूर्ध्नि भूमौ तथाकाशे यजुर्वेदे सुरेश्वरि॥ सामाथर्वेदिनं देवि ऋग्वेदे शृणु शैल
जे॥ भून्मे शिरसि चाकाशे भूमौ भून्मे शिरे तथा॥ भूमौ भून्मे तथा मूर्ध्नि चोपमार्जन
माचरेत्॥ आपो हि ष्ठेति ये मंत्रा अष्टाक्षरपदेन तु॥ मार्जनं यत्कृतं पूर्णं च सर्वपाप
विनाशनं॥ व्यतिक्रमेण चार्वंगि ब्रह्महत्या पदे पदे॥ अत एवं क्रमेसर्वं तत्र वस्तु हास्य
काशितं॥ स्तुतिं च कवचं देवि पठित्वा प्रणमेत्सुधीः॥ श्रीदेव्युवाच॥ तुरीयधामो देव
परमात्मा स एव हि॥ शिवः पद्मे स्थितं वा ह्येन नमस्कारः कथं भवेत्॥ श्रीशिव उवाच॥

राम: ६

शिरः पद्मे महादेवस्तथैव परमो गुरुः॥ तत्समो नास्ति देवेशि पूज्यो हि भुवनत्रये॥ तद्रू
पं चिंतयेन्मंत्री बाह्ये गुरुचतुष्टयं॥ तद्दशाभावसंभूता येवान्ये गुरवो जनाः॥ तथैव
ब्राह्मणाः सर्वे चो सावतारसंस्थिताः॥ यदेव बाह्ये चैतांश्च प्रत्यक्षे भावयेत्तदा॥ सह
स्रारे महापद्मे तदा चिंतां विवर्जयेत्॥ प्रत्यक्षे दर्शने देवि बाह्ये तत्सलचिंतयेत्॥ न
मस्कारादिकं देवि कुर्यात्साधकसत्तमः॥ एषां दर्शनमात्रेण नमस्कारादिकं चरेत्
न कुर्याद्यदि मोहेन सभवेदापदाश्रयः॥ ब्राह्मणादीन्समालोक्य ब्रह्मचारी यतित्
त्रयं॥ दृष्टिमात्रेण गिरिजे प्रणमेद्दंडवद्भुवि॥ महापातकयुक्तोऽपि मुक्तो भवति
तत्क्षणात्॥ न कुर्याद्यदि मोहेन महापातकवान्भवेत्॥ रक्तवस्त्रं समालोक्य त
था भस्माङ्गभूषणं॥ दंडहस्तं त्रिशूलं च दृष्ट्वा प्रदक्षिणात्रयं॥ प्रकुर्यात्साधकश्रेष्ठ

नि.तं. ७

श्चान्यथा घातकी भवेत्॥ ४८॥ इति श्रीनिर्वाणतंत्रे तृतीयः पटलः॥ ३॥ ॥ श्रीदे
व्युवाच॥ संन्यासी कीदृशो नाथ अवधूतश्च कीदृशः॥ कीदृशो वा ब्रह्मचारी गृहस्थो वा
थ कीदृशः॥ श्रीशिव उवाच॥ दिव्यप्रकाशमूर्त्तिं च चिंतयेद्दंडधारिणं॥ गृहस्थस्य
दिव्यमूर्त्तिं चंदनादिविभूषितं॥ सर्वयोगिस्वरूपोऽसौ गृहस्थः साधुरूपकः॥ श्रीशि
व उवाच॥ शृणु देवि प्रवक्ष्यामि ब्रह्मांडलक्षणं॥ मेरुपर्वतमध्ये तु सर्वदेवाश्र

राम: ७

यं प्रिये॥ महाक्षीरा नदीं तत्र मध्यदेशे सदा स्थिता॥ सुमेरोश्चोर्ध्वदेशे तु सत्यलोकं
वरानने॥ अधोभागे महेशानि प्रतिष्ठितिरसातलं॥ एवं क्रमेण सर्वं भुवनानि
चतुर्दश॥ पातालसप्तकस्योर्ध्वं ब्रह्मपद्मं सुरेश्वरि॥ अधोवक्त्रं हि तत्पद्मं धरामध्ये
चतुर्दलं॥ पद्ममध्ये बीजकोषे क्षितिचक्रं मनोहरं॥ वलयाकाररूपेण सप्तद्वीपस

प्रसंस्थिता॥ जम्बुद्वीपं मध्यदेशे चतुष्कोणं मनोहरं॥ त्रिकोणं मदनागारं कंदर्प
श्चाधिदेवता॥ तद्बीजं हि लंरूपं गजेन्द्रवाहनं शिवे॥ त्रिकोणं मदनागारं विन्दु
रूपो महेश्वरः॥ मायाशक्तिर्महेशानि भुजंगाकाररूपिणी॥ तयैव वेष्टितं लिंगं
सार्द्धत्रिवलयाकृतिः॥ लिंगं छिद्रं स्ववक्त्रेण समाच्छाद्य स्थिता सदा॥ एवं बीजं
वरारोहे लिंगस्य वामदेशके॥ सुसिद्धं ब्रह्मसदनं नादयाश्च सुंदरं॥ तत्रैव निव
सेद्ब्रह्मा सृष्टिकर्ता प्रजापतिः॥ वामभागे च सावित्री वेदमाता सुरेश्वरी॥ तस्याः
प्रसादमासाद्य सृष्टिं वितनुते सदा॥ तद्रूपं ब्रह्मसदनं लक्षयोजनविस्तृतं॥ तत्स
र्वं परमेशानि ऋग्वेदाख्यं मयोदितं॥ त्रिकोणं परमेशानि हि वेष्टितं मकोष्टकं॥
तदेव पर्वतं प्रोक्तं सर्वदेवाश्रयं हि तत्॥ त्रिकोणमध्ये तत्रास्ये पश्चात्सर्वं वरानने॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं. स्थाद्यो पर्वतं पञ्चपक्षीहं पशु मनुजमं ॥ स्वर्गनरादिकं देवि नास्ति किं पृथिवीत
८ ले ॥ त्रिकोणाबाह्ये गिरिजे पर्वतं वज्ररूपकं ॥ नीलाचलं मन्दरं च पर्वतं चन्द्रशे
खरं ॥ हिमालयं सुमेरुं च मलयं भस्म पर्वतं ॥ चतुष्कोणो वसेद्देवि एतत्समष्टकु
लाचलं ॥ एतेषां शिखराज्जातं पर्वतं वज्ररूपकं ॥ नानादेवालयं देवि तथैव
दानवालयं ॥ नराणां मन्दिरं तत्र स्त्री नानारूपाणि तत्र वै ॥ मापिष्टा तत्र वै जाताः राम.
क्रमयोगेन यान्ति वै ॥ जायन्ते च मनुष्यं तत्र पूर्वोक्तेन वर्त्मना ॥ २२ ॥ इति निर्वाण ८
तन्त्रे योगविवरणं नाम चतुर्थः पटलः ॥ ४ ॥ ॥ श्रीशिव उवाच ॥ एतत्पद्म
स्योर्द्ध्वदेशे भीमास्यं पंकजं शुभं ॥ पत्रषड्कं तथा हृत्तं चतुर्द्वारविभूषितं ॥ पद्ममध्ये

वीजकोषे भुवर्लोकं मनोहरं ॥ सिंदूरसदृशं रक्तवर्णं सुशोभितं सदा ॥ सिंदूरारक्तव
स्त्रेण निर्मितं चक्रपाणिना ॥ तस्योर्द्ध्वे निवसेद्विष्णुः श्रीलक्ष्मीर्वामदक्षिणे ॥ ब्रह्मणा
स्वर्गमते लोकः पाल्यते चक्रपाणिना ॥ वैकुण्ठं नाम तत्स्वर्गं नानादेवालयं हि तत् ॥ वैकु
ण्ठस्य दक्षभागे गोलोकं सर्वमोहनं ॥ तत्रैव राधिका देवी द्विभुजो मुरलीधरः ॥ नार
दाद्यैर्मुनिगणैः सेवितं वै दयार्णवे ॥ वैकुण्ठसदृशं स्थानं नास्ति ज्ञाने तु मामके ॥ अत्र
मध्ये तथावासं यथा सर्वं प्रपश्यति ॥ तथैव भूमिगाः सर्वे ज्ञाननित्यं प्रपश्यति ॥
नानाभोगयुताः सर्वे नानारत्नेन भूषिताः ॥ इन्द्राद्या देवताः सर्वे तिष्ठन्ति स्तुतिहेतवे ॥
महासत्त्वमयं लोकं वेदवाक्यविराजितं ॥ पीताम्बरं शान्तमूर्त्तिं वनमालाविभूषितं
॥ एवम्भक्तजनं सर्वं वैकुण्ठेनोपशोभितं ॥ विष्णुशार्ङ्गं विष्णुगणं वै सर्वं विष्णुरूपकं

नि.तं. विष्णुगानं विना नास्ति वैकुण्ठे परमेश्वरि ॥ यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके
९ ॥ ज्ञानेवा वायुसेकिं वा ध्यानयोगेन विद्यते ॥ शुद्धसत्त्वमयं देवि नानादेवेन शोभि
तं ॥ तत्रैव भाति कैलासं तत्रैव ब्रह्मणः पुरं ॥ वैकुण्ठनगरं तत्र तत्रैव रविरालयं ॥
चन्द्रालयं हि तत्रैव कन्दर्पनिलयं प्रिये ॥ सर्वदेवालये तत्र देवकन्या द्विशोभितं ॥
मध्यदेशे गोलकाख्यं श्रीविष्णोर्भोगमन्दिरं ॥ श्रीविष्णोः सत्त्वरूपस्य यत्स्थलं सि राम.
तनमोहनं ॥ तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेऽधुना ॥ यत्रैव सततं भाति द्वि ९
जो मुरलीधरः ॥ निराकारो महाविष्णुः साकारो पि क्षणेक्षणे ॥ यदा साकाररूपोसौ
तेऽद्वय मुरलीधरः ॥ तदा सत्त्वमयो विष्णुर्भवनं पाति निश्चितं ॥ वैष्णवस्य महामोक्षं
यत्रैव परमेश्वरि ॥ इति स्थानस्य माहात्म्यं संक्षेपेण मयोदितं ॥ विस्तरेणानन्तकोटिज

गं धर्वयक्षनागादि कूष्माण्डाभैरवास्तथा ॥ नानानृत्यविलासेन सदा वै कान्तके
तस ॥ विष्णुगानं प्रकुर्वन्ति स्तुतिभक्तिपरायणाः ॥ वेदगानं प्रकुर्वन्ति चतुर्वक्त्रे
त्वं धसा ॥ मालवं वा ... गाः ... मुनिगणाः ॥ ४५
न्मा तं रक्षितेन च ॥ वीजकोषस्य वाह्ये तु वेष्टितं तोयमण्डलं ॥ प्रमाणे सुन्दरं तोयं र
यथा क्षीरोदसागरं ॥ धुस्तस्य ज्योतिषाकारं कोटिचन्द्रसमद्युति ॥ वलयाकारत
पेण शुभ्रं तोयमण्डलं ॥ गंगादि शोभितः सर्वास्तत्रैव भाति सुन्दरि ॥ इन्द्रादि दे
वताः सर्वस्तूयमाना निरन्तरं ॥ गन्धर्वयक्षनागादि कूष्माण्डा भैरवास्तथा ॥ वेदगा
नेन भासेन मूर्त्तिमन्त सदेवहि ॥ मालवेनैव रागेन साम गाने सदा प्रिये ॥ मध्यारेण
सदार्थं वसन्तेन तथा पुनः ॥ हिन्दोलेन यजुः पाठं सदा कुर्वन्ति वेधसा ॥ कर्णाटेनैव
कृष्णदेश्रीरागेन तथा शिवे ॥ निर्दिष्टः पाठमतन्तु अनिर्दिष्टमतः परं ॥ तत्रैव वर्त्तते रा
गाः सहस्राणि च षोडश ॥ तत्रैव भाति तालाश्च सहस्राणि च षोडश ॥ पुरा रञ्जरली
गानात्सर्वतालाप्रजायते ॥ तेन तालेन रागेण सदा गायन्ति वेधसा ॥ तडागस्य वि

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि॰तं॰ १० भागं हि कुर्वन्ति मुनयो जना॥ वसंताद्याश्च पुरस्थे वनितेष्वनितं च संतानं॥ नानाधातुप्रभूतेन
भूषितं मुरलीधरं॥ तत्रैव राधिका देवि नानासुखविलासिनी॥ वदन्ति मुरलीगानेकुतू
कानप्रमोहनं॥ येन शब्देन कामस्य उत्पत्तिर्जायते सदा॥ तद्गणश्चैव तत्तालं कुहूगाने
प्रयत्नतः॥ एवमानन्दसंयुक्ता महानेशविलासिनी॥ वामभागे सदा भाति राधिका
भक्तवत्सला॥ प्रार्थनेकं प्रकुर्वती राधिका भक्तिसंयुता॥ श्रीराधिकोवाच॥ तव भ राम॰ १०
क्तियुतास्तस्याश्चाथवा भक्तिसंयुता॥ गोलोकस्थं महाविष्णुं द्विभुजं मुरलीधरं॥ सदा
नेद्युतं देवं मम संगे विराजितं॥ एवं ध्यायंति ये मर्त्यास्तस्यापाय स्युः को हन्त॥ तद्रहस्यं
विशेषेणाद्य ग्रहं तव वक्ष्यमा॥ श्रीभगवानुवाच॥ ये यथा मां भजंते मेवं तन्मार्गं गास
ऋति॥ दास्यामि शृणु चार्वंगी सदा त्वं भक्तवत्सला॥ आदौ राधां ततः कृष्णाजल्पंति ये

वमानवाः॥ तेषां च स्वसकृति आत्र दास्यामि नात्र संशयः॥ तु रूणां भावमार्गेण मंत्रमा
र्गेणैव वहि॥ ये जना मां भजंत्येव तेन राम त्वमाः सदा॥ या नारी सा मभेदेन गजाते पु
रुषं सदा॥ त्वत्समा सा सदा नारी जायते नात्र संशयः॥ भक्त्या वाप्यथवा भक्त्या जल्प
ति युगलं यदि॥ तव भक्त्या प्रदास्यामि सद्गतिं शृणु राधिके॥ मद्भक्तो न वगच्छति क
दाचिद्यममंदिरं॥ सत्यं सत्यं पुनः सत्यं सत्यं सत्यं हि राधिके॥ इति श्रुत्वा प्रसादं वै रा
धिका प्रेमवत्सला॥ अंकेशेन महाविष्णो कामबाणेन पीडिता॥ विष्णुलोकमिमं दे
वि चापरं शृणु यत्नतः॥ ४१ ॥ इति श्रीनिर्वाणतंत्रे पंचमः पटलः॥ ५॥ ॥ श्रीशं
कर उवाच॥ एतत्तु परमस्थेऽब्दे देशे महापद्मसमुज्ज्वले॥ दशपत्रे नीलवर्णे सजलघन
रूपकं॥ तादिफांतैः स्वबद्ध्यैश्च पंकजे वा तिशोभितं॥ तन्मध्ये वाम कोणे निवसति सत

नि॰तं॰ ११ तं वह्निवीजं सुमिष्टं॥ तास्येन तच्चैव पुरा रवेन वतपन निभं स्वस्तिकं तत्र भागे॥ स्वर्लोका
ख्यमिदं देवि सर्वदेवैः प्रपूजितं॥ साकारं वह्निवीजं च सदेवमेषवाहनं॥ रुद्रालयं हि त
त्रैव महामोहस्य नाशनं॥ भद्रकाली महाविद्या वामभागे सुशोभिता॥ भद्रकाली महा
विद्या सदा संहारकारिणी॥ ब्रह्मणा सृज्यते लोकः पाल्यते विष्णुरूपिणा॥ परदेवो
रुद्ररूपः सदा संहारकारकः॥ संहरेद्रुद्ररूपेण भद्रकालिकया सह॥ रुद्रस्य भावनादे राम॰ ११
वि किंन सिद्ध्यति पार्वति के॥ यद्रूपं कथितं पूर्वं गोलके सर्वमोहनं॥ तस्मात्सर्वतो भावरु
द्रलोके चतुर्गुणं॥ रुद्रलोके महास्वर्गं गोलोकाद्धि चतुर्गुणं॥ महामोक्षप्रदं नित्यं रुद्र
मस्मांग भूषणं॥ भद्रकाली महाविद्या रुद्रस्य वामदेशके॥ विष्णुना पाल्यते यत्का
लीरूपेण भुज्यते॥ अतः काली महादेवी सेवते मुरलीधरः॥ आराध्य वाक्यलेन वैकु

ण्ठाधिपतिर्भवेत्॥ गोलोकाधिपतिर्देवि स्तुतिभक्तिपरायणः॥ कालिकायाः प्रसा
देन सम्भवेत्लोकपालकः॥ लोकानां रक्षणार्थाय सर्वलोकाम्मुरलीधरः॥ समाराध्य
भद्रकालीं गोलोके निवसेत्सदा॥ प्रसादात्कालिकायाश्च सृज्यते विष्णुना सदा॥ अन
न्तपालको विष्णुर्महासत्वपरायणः॥ ४४ ॥ इति श्रीनिर्वाणतंत्रे षष्ठः पटलः॥ ६॥
॥ ॥ श्रीशंकर उवाच॥ एतत्तु परमस्था हृद्देशे विमलपद्मसुंदरं॥ शोभितं द्वादशैः
पत्रैः शोणा बंधूकसन्निभं॥ वांछातिरिक्तफलदं पुष्पासिंदूरसोदरं॥ पद्ममध्ये वीज
कोणयुक्तो रमणमण्डले शुभं॥ मंडलस्य मध्यदेशे वायुवीजं मनोहरं॥ सर्ज्जो वै वायुवी
जं च वेदवाक्यविराजितं॥ लोकत्रयस्य ईशानं ईश्वरं सर्वपूजितं॥ या विद्या भुवनेशानि
त्रिषुलोकेषु पूजिता॥ ईश्वरस्य वामभागे सा देवी परितिष्ठति॥ महर्लोकमिदं भद्रे

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नी.तं. १२ मूलाधारस्थाने सुरेश्वरि ।। अत्रैव मानसं यागं कुरुते योगवित्तमः ।। सिंदूरारक्तचार्वंगि स्फा
टिकेनिर्मितं ततः ।। अतश्च मानवाः सर्वे ज्योतिषं परिपश्यति ।। सर्वाश्च वसंभुक्ता देवा सि
द्धंति संततं ।। भूमिगाः परिपश्यंति चक्राकारं हि तेजसं ।। स्वर्लोकगामिनः सर्वे स्वर्गं गति
रंति पार्वति ।। भूर्लोके निवसेद्ब्रह्मा भुवर्लोके जनार्दनः ।। स्वर्लोके निवसेद्रुद्रः सदा
संहारकारकः ।। ब्रह्मादीनां च ईशानः सर्वकर्त्ता च ईश्वरः ।। सर्वस्वामी स्वरूपश्च सर्वक राम: १२
र्त्ता सुरेश्वरः ।। सृष्टिस्थितिलयादीनां कर्त्ता च परमेश्वरः ।। गोलोकं कथितं देवि यद्रूपं
शोभितं सदा ।। तस्मात्कोटिगुणं देवि महर्लोकं सुसुंदरं ।। विस्तीर्णं च शतकोटीनां सर्वं शत
गुणं शिवे ।। महर्लोकस्य माहात्म्यं किं वक्तुं शक्यते मया ।। गोलोकस्य शतगुणं सर्वं च पर
मेश्वरि ।। महर्लोके वसेद्यो हि सामान्यभावतत्परः ।। तस्मादेव शतांशैकं गोलोकस्थलोध

रं ।। तदांशं प्राप्य सहसा स्पृश्यते पुनर्योनिना ।। तदाश्रयापाति लोकानां दृष्टिगोचर
लीश्वरः ।। एवं हि रुद्ररूपेण सहस्रमखिलं जगत् ।। सर्वकर्त्ता यतो देवि अतः सपर
मेश्वरः ।। ईश्वरः सर्वकर्त्ता च निर्गुणश्चाचलः शिवः ।। भुवनेशीं विना देवि स्पंदितुं ने
व शक्यते ।। पंचप्राणाः सदा हंसो गामित्वं नहि शक्यते ।। भुवनेशीं समाराध्य सर्वस्वामी
स ईश्वरः ।। अतएव महेशानि नित्यं च मोक्षदायिनी ।। विश्वमाता च सा देवी विश्वपाल
नकारिणी ।। मोक्षदा सर्वलोकानां भुक्तिदा विश्वमातृका ।। भुवनेशीं विना ईशः किं
चित्कर्तुं न शक्यते ।। अतएव हि सा देवी मोक्षदा सर्वरूपिणी ।। इति ते कथितं किंचित्
महर्लोकस्य लक्षणं ।। समासेन वरारोहे अथान्यच्छृणु सादरं ।। २२ ।। इति श्रीनि
र्वाणतंत्रे सप्तमः पटलः ।। ७ ।। ।। श्रीशंकर उवाच ।। अस्योर्द्ध्वे निर्मलपद्मं

नि.तं. १३ सर्वमोहनकारणं ।। षोडशैः पत्रकैर्युक्तं मोहांधकारनाशनं ।। धूममध्ये यथा वह्निस्त
थाज्योतिर्मयं प्रिये ।। पद्ममध्ये वरारोहे जनलोकं सुसुंदरं ।। महामोहांधशमनं तद्वा
द्यैर्वंद्यगणाकुलं ।। देवगंधर्वगोधकैश्च मुनिभिः परिशोभितं ।। गोलोकस्य लक्षगुण
मिहस्थानं सुदुर्लभं ।। देवत्वं च मनोज्ञं च विस्तीर्णं च तथाऽनघः ।। सर्वं लक्षगुणो देवि
गोलोकान्नात्र संशयः ।। बीजकोषे मणिद्वीपे षट्कोणं यंत्रमुत्तमं ।। यंत्रमध्ये तु वृषभं म राम:
हासिंहार्द्धदेहकं ।। तस्योपरि सदा गौरी दक्षभागे सदाशिवं ।। त्रिनेत्रं पंचवक्त्रं च प्रतिवक्त्रे १३
त्रिलोचनं ।। विभूतिभूषितांगश्च रजताचलसोदरः ।। व्याघ्रचर्मधरो देवो मणिमाला
विभूषितः ।। लोकानामिष्टदाता च लोकानां भयनाशनः ।। लोकानां मुक्तिजनको लोकानां
ज्ञानदायकः ।। आराधकस्य ब्रह्मत्वदायको विष्णुपूजितः ।। सर्वानन्दकरो देवो अर्द्धना

रीश्वरो विभुः ।। क्वचिज्ज्योतिर्मयो देवः क्वचिदाकारवर्जितः ।। देवानां पूज्यरूपश्च
देवानां स्वामिरूपकः ।। भक्तस्य मुक्तिदो नित्यो विष्णुत्वदायकः प्रभुः ।। बिल्वपत्रैः पूज
कस्य निजसायुज्यदायकः ।। गोलोकाधिपतिं कृत्वा भक्तं रक्षति यः शिवः ।। तस्य दे
वस्य माहात्म्यं किं विस्तारेण चंडिके ।। या गौरी लोकमाता च शंभोरर्द्धांगधारिणी ।।
त्रिगुणा सा महागौरी गुणैः केन पिनाकधृक् ।। तस्याः संगं समासाद्य सर्वकर्त्ता सदा
शिवः ।। १४ ।। इति निर्वाणतंत्रे अष्टमः पटलः ।। ८ ।। ।। श्रीशंकर उवाच ।। एतत्
पद्मस्योर्द्ध्वदेशे तु ज्ञानपद्मं सुदुर्लभं ।। पत्रद्वयसमायुक्तं पूर्णचन्द्रस्य मंडलं ।। पद्मम
ध्ये बीजकोषे स्मरेच्चिंतामणिपुरीं ।। तन्मध्ये नवकोणं च यंत्रं परमदुर्लभं ।। त्रिगुणबी
जं हि तन्मध्ये साकारं हंसरूपिणं ।। हंसः परं ब्रह्मरूपः साकारः शिवरूपकः ।। तारश्च

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि·तं· तारस्थकुर्वरारोह निगमागमपक्षवान्॥शिवशक्तिपदद्वंद्वं बिन्दुत्रयविभूषितं॥वि॰
७४ हारस्थास्य हंसस्य व्योमपंकजपूरिते॥स्वहस्तमणिर्दिप्तस्याकोडे:परः शिवः॥वाम॰
भागेसिद्धकालीसदानंदस्वरूपिणी॥तस्याः प्रसादमासाद्यसर्वकर्त्ता महेश्वरः॥तपो
लोकमिदंभद्रे सर्वदेवसुदुर्लभ॥यत्रब्रह्मादयो देवाध्यानयोगसमभ्यसेत॥मनसापिन
भ्येतयोगेनतपसानच॥तपोलोकं गोलकस्यचतुर्लक्षयोजनं शिवे॥ब्रह्मलोके भयेदेवा·
वैकुंठेयेसुरादयः॥शंभुलोकेवसन्तेयेतेचभक्तिपरायणाः॥तपसापिनलभ्यंतेतपोलो राम: ७४
कमतःशिवे॥तपोलोकसमोनास्तिलोकमध्येसुलोचने॥सालोक्यंहिमहर्लोकेसारूप्यं
जनलोकके॥सायुज्यंतपलोकेचनिर्वाणंहितदूर्ध्वके॥अतोब्रह्मादयोदेवास्तपोलोका
र्थिनःसदा॥तस्यलोकस्यमाहात्म्यंमयावक्तुंनशक्यते॥इतितेकथितंकांतस्वर्गषट्कस्य

लक्षणं॥यज्ज्ञानादमरत्वंचजीवन्मुक्तश्चसाधकः॥यज्ज्ञानाज्जननीगर्भेनविशंतिक
दाचन॥आयुरारोग्यमैश्वर्यंसप्राप्नोतिनसंशयः॥पुराणानिचसर्वाणिसमयेवोक्तानि॰
पार्वति॥एतद्रूपंचतन्मध्येव्यक्तरूपानविद्यते॥गूढज्ञानंचतन्मध्येअतःकिंचिन्न
उच्यते॥एवंहिवेदशास्त्रेषुगानमध्येसुलोचने॥शास्त्रज्ञानंयतोनास्तिअतःकिंचिन्नउ
च्यते॥अष्टादशपुराणानिसांगंवेत्तिचयोनरः॥तस्यस्थानेपुराणानिसदाश्रवणमा
चरेत्॥तुंडकेचाल्पपापश्चैनश्रोतव्यंकदाचन॥शास्त्रस्यलक्षणंह्येतत्व्याख्याचान्यथ
कारयेत्॥शब्दब्रह्मस्वरूपंश्चयमवक्त्राद्विनिर्गतं॥संदेहोनैवकर्त्तव्योयदिसिद्धिंप्रयच्छति
॥संदेहान्नामरोयातिरौरवंपितृभिःसह॥ज्ञानंचनिर्मलंकृत्वाबुद्धिंचनिर्मलांततः॥महा
शक्तियुतोभूत्वासर्वप्राणिहितेरतः॥शब्दब्रह्ममयंज्ञात्वाश्रृणोतितंत्रकंयदि॥तदपुक्ति

नि·तं· मवाप्नोतिसत्यंसत्यंनसंशयः॥अष्टादशपुराणानिश्रवणेनैवयत्फलं॥चतुर्वेदानिसांगा
७५ निश्रवणेनैवयत्फलं॥मेरुतुल्यसुवर्णंचअश्ववेदस्वरूपिणे॥सहस्रांपरमेशानिसप्त
द्वीपांवसुंधरां॥प्रदद्याद्भक्तिभावेनयदिस्याद्देवपारगे॥तस्माद्धिपरमेशानिफलंचकु
विधंशिवे॥अस्यतंत्रस्यचार्वंगिश्रृणोतिपटलंयदि॥तत्फलात्कोटिगुणितंफलंसल
भतेध्रुवं॥२८॥इतिश्रीनिर्वाणतंत्रेनवमःपटलः॥९॥ ॥श्रीशंकरउवाच॥ज्ञानपद्म राम:
स्याधूर्द्धदेशेसहस्रदलपंकजं॥अधोवक्त्रंमहापद्मंसुमेरोर्मूर्द्धिसंस्थितं॥यस्यपत्रेम ७५
हेशानिसर्वशक्तिसमन्वितं॥शुक्लरक्तंतथापीतंकृष्णंहरितमेवच॥विचित्रंचित्ररूपे
णनानावर्णेनशोभितं॥शुक्लंक्षणात्रक्तक्षणात्कृष्णंक्षणात्पीतंसुशोभनं॥कस्मिन्क्षणे
शुक्लवर्णंहरितंवर्णमुत्तमं॥चित्ररूपंचचार्वंगिधत्तेकाले स्वरोत्प्रिये॥एवंनानाविधैर्दे

वितत्पद्मंशोभितंसदा॥यथैवगोलकंधामप्रतिपत्रेतथैवहि॥गोलकाधिपतिस्तत्र
भक्तिभावपरायणाः॥कैलासाधिपतिर्देविध्यानयोगंसदाभ्यसेत्॥एवंब्रह्मादयोदे
वानीन्द्राद्याश्चदिगीश्वराः॥स्तुतिभक्तिपराःसर्वेदिव्यभावैःसदास्थिताः॥लक्षंल
क्षंमहेशानितत्रैवमुरलीधरं॥शतलक्षंशिवंतत्रब्रह्मालक्षशतंप्रिये॥प्रत्यक्षंपरमे
शानिब्रह्माण्डावहवोभवेत॥तन्मध्येस्थापयेद्ब्रह्मातत्रैवकमलापतिं॥शिवंबहुवि
धाकारंतत्रैवस्थापनंचरेत॥एवंहिपरमेशानिनानाशक्तिंप्रविन्यसेत॥प्रतिब्रह्माण्डम
ध्येतुब्रह्मादिदेवतात्रयं॥नानाशक्तियुतंकृत्वाब्रह्माण्डंस्थापनंचरेत॥ब्रह्मपद्मेपृथि
व्यांतुवर्त्तंतेमानुषादयः॥तेसर्वेदेविब्रह्माण्डातन्मध्येभुवनानिच॥पातालसप्तकंतत्र·
तत्रैवस्वर्गसप्तकं॥एवंक्रमेसर्वदेहेभुवनानिचतुर्दश॥प्रतिदेहेपरेशानिब्रह्माण्डना

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं. १८
त्र संशयः॥ कथितं तात् देवेशि ब्रह्माण्डस्य च लक्षणं॥ यन्मध्ये वर्त्तते साक्षाद् भुवना
नि चतुर्द्दश॥ तदेव विग्रहं देवि महाब्रह्माण्डमध्यगं॥ एवं बहुविधं देवि तत्त्व ब्रह्माण्ड
के स्थितौ॥ बृहद्ब्रह्माण्डं यत् सर्वं तेपि जन्यः शरीरिणः॥ पृथिव्यां तेपि वर्त्तन्ते जंतौ रा-
कार विग्रहाः॥ महाब्रह्माण्डमध्ये तु बृहद्ब्रह्माण्ड तिष्ठति॥ तन्मध्ये जन्तवो देवि तन्
मध्ये भुवनानि च॥ सृष्टिमार्गेण भेदोस्ति स्थूलसूक्ष्मादिभेदकः॥ महाब्रह्माण्ड राम: १८
के यद्यत् प्रकारं परमेश्वरि॥ तत्तत्सर्वं हि देवेशि बृहद्ब्रह्माण्डमध्यतः॥ तेन रूपे देहम
ध्ये भुवनानि चतुर्द्दश॥ सृष्टिप्रकारं ब्रह्माण्डभेदानां शिवनिश्चितं॥ स्थूलसूक्ष्मा
दिचार्वंगि भेदकं परिचारकः॥ पद्ममध्ये बीजकोषे भुवनानि चतुर्द्दश॥ स्थानं बहु
विधाकारं सर्वदेवस्य चाश्रयं॥ तन्मध्ये सत्यलोकं च महारुद्रस्य कारणं॥ दशकोटि

नस्वर्णेन निर्मितं चक्रपाणिना॥ दिक्षु तोयमंडलं च यथा पूर्णेन्दुमंडलं॥ पीतः पारिजाता
निमध्ये कल्पद्रुमस्तु तः॥ कल्पवृक्षस्य निकटे ज्योतिर्मंदिरमुत्तमं॥ उद्यदादित्यसंकाशं
चतुर्द्वारविभूषितं॥ मन्दवायुसमायुक्तं गंधधूपैरलंकृतं॥ तन्मध्ये वेदिकां देवि रत्नसिं
हासनं प्रिये॥ महाकालीच परमो घनकाकाररूपतः॥ मायया छादितात्मानं तन्मध्ये स
मभागतः॥ महारुद्रस एवात्मा महाविष्णुः स एव हि॥ महाब्रह्म स एवात्मा नाम गात्रवि
भेदकः॥ एकमूर्त्तिस्त्रयो नाम्ना ब्रह्मविष्णुमहेश्वराः॥ नानाभावे मनो यस्य तस्य मोक्षो न
विद्यते॥ ब्रह्माण्डे सत्वगा मं ते लक्षं लक्षं सुलोचने॥ तत्र ब्रह्मा तत्र हरिस्तत्र रुद्रः प्रविश्य
सेत्॥ एवं ब्रह्माण्ड निर्माणं कृत्वा विष्णुः सनातनः॥ सजीवं मूर्त्तिं निर्माय यथा जन्तोश्च वि-
ग्रहं॥ एवं ब्रह्माण्डं त्रिविधं नित्यं सृजति निर्गुणः॥ निर्गुणाच्चिद्रूपश्च सृष्टिकारण ए

नि.तं. ७
व हि॥ केचिद्वदन्ति सद्ब्रह्म केचिद्विष्णुः प्रकथ्यते॥ केचिद्रुद्रो महापूर्व एकदेवो निरंजनः
आद्याशक्तियुतो देवश्च घनकाकाररूपकः॥ इन्द्रजालस्पर्द्धापाभवद्रुसयांग्निरूपकः॥
महाज्योतिर्निराकारः सुदर्शं वायगोलकं॥ सत्यलोके बीजकोषे चिन्तामणिगृहे शु
भे॥ ध्यायेन्निरंजनं देवं रत्नसिंहासनोपरि॥ तस्यान्तिके निजगुरुं पूजाध्यानपरायणो
॥ एकान्ते पूजयेद्देवं रजतावलसोदरं॥ सुवक्त्रां चारुवदनां सुकाशस्वरूपिणीं॥ ए राम: ७
वं कान्ताप्रुतं देवं स्वमूर्त्तिस्थं विचिन्तयेत्॥ यथा दर्पणगर्भे तु प्रतिपन्ति सर्वतः॥ सहस्रा
रे महापद्मे तथा देवं विचिंतयेत्॥ परंब्रह्मालयं देव तन्मरं मोक्षालयं प्रिये॥ निर्गुणस्या
लयं साक्षान्महाकाल्यालयं शिवे॥ तत्रैव वर्त्तते नित्यो निराकारश्च निश्चलः॥ यस्याः रूपं प
रानन्दं परं परं जगत्पतिः॥ नित्यानंदपरा देवी काली कालप्रकाशिनी॥ आद्याशक्ति

र्महाकालि देवनिर्वाणकारिणी॥ जायन्ते च क्षितौ वृक्षा यथा पृथ्व्यां प्रलीयते॥ तो
यात् बुद्बुदं जातं यथा तोये विलीयते॥ जलं तेजोऽहि उत्पन्नं लीयते च यथा घने॥ तथा ब्र
ह्मादयो देवाः कालिकायाः प्रजायते॥ तथा प्रलयकाले तु पुनस्तस्याः प्रजायते॥ शक्ति
ज्ञानं विना देवि मुक्तिहास्याय कल्पते॥ एकांशेन भवेद्ब्रह्मा एकांशेन जनार्द्दना॥ एकां
शेन भवेत् शंभुः कालिकायाः सुलोचने॥ अपरासां महाकालीनत्यादीनां समुद्भव
तः॥ गोप्यं देव यथा तोयं ब्रह्माद्या देवतास्तथा॥ गोप्यं देवि किं विजानीयात् त्वमद्भस्य
जलं शिवे॥ तेन ब्रह्मा न जानाति विष्णुः किं वेत्ति शंकरः॥ सृष्टिकर्तृ यदा काल्या
तन्यन्ते बसुरादयः॥ तथा प्रलयकाले तु पुनस्तस्यां प्रलीयते॥ अतो निर्वाणदा
काली पुरुषः स्वर्गदायकः॥ दक्षिणस्यां दिशि स्थाने संस्थितश्च रवेः सुतः॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि॰तं॰ कालीनाम्ना या जायन्ते नीतिरुक्तः समन्ततः॥ ततः सा दक्षिणा नाम्ना त्रिषु लोकेषु गी
१८ यते॥ पुरुषो दक्षिणः प्रोक्तो वामा शक्तिर्निगद्यते॥ वामया दक्षिणां जित्वा महामोक्ष
प्रदायिनी॥ अतः सा दक्षिणा नाम्नी त्रिषु लोकेषु गीयते॥ निर्गुणं पुरुषं कालात्स्तम्भ
ने स्तुष्यते यतः॥ अतः सा दक्षिणा नाम्नी त्रिषु लोकेषु गीयते॥ देवी या महाविद्या
कालिका जगदंबिका॥ साकाररूपा सा काली घनकाकाररूपिणी॥ हस्तपादादिर रम॰
हिता सोमसूर्याग्निरूपिणी॥ तस्याः स्थानं हि कथितं सत्यलोकं वरानने॥ यत्स्थानं १८
सर्वदेवस्य प्रार्थनीयं सदानघे॥ तस्य स्थानस्य माहात्म्यं किं मया कथ्यते धुना॥ सह
स्रदलपद्मस्यैकपत्रे सुलोचने॥ सहस्रगोलकं धाम अतो वक्तुं न शक्यते॥ जन्मांत
रसहस्रेण जिह्वाकोटिशतेन वा॥ तद्वक्तुं नहि शक्नोमि एकपत्रस्य शोभनं॥ अतस्त्वं

हि वरारोहे विरता भव पार्वति॥ किंजल्कमध्यया शोभा किं वक्तुं शक्यते मया॥ तन्म
ध्ये कर्णिका देवि तन्मध्ये बीजकोषकं॥ बीजकोषस्य मध्ये तु सुधासागरमुत्तमं॥
लक्षयोजनविस्तारं सुशुभं तोयमण्डलं॥ तन्मध्ये तु मणिद्वीपं सहस्रयोजनं शि
वे॥ परितः पारिजातांश्च कल्पवनमुत्तमं॥ मध्ये कल्पद्रुमं तत्र ज्योतिर्मंदिरमुत्त
मं॥ चतुर्द्वारसमायुक्तं हेमप्राकारभूषितं॥ नन्दवाद्यसमायुक्तं गंधपुष्पसमन्वि
तं॥ देवकन्यासहस्राणि परिचर्यापरायणाः॥ तन्मध्ये वेदिका देवि पंचाशदक्षरा
त्मिका॥ तस्योपरि महेशानि रत्नसिंहासनं शिवे॥ महाकाली महारुद्रश्च घनकाकार
रूपकं॥ इन्द्रजालस्य दीपाभं महाज्योतिः सनातनः॥ इति ते कथितं कान्ते सत्यस्वर्गं क्र
मेण हि॥ श्रुत्वा गोपय यत्नेन न प्रकाश्यं कदाचन॥ अतिस्नेहेन देवेशि तव स्थानं

नि॰तं॰ प्रकाशितं॥ संक्षेपेण मया प्रोक्तं विस्तारेण हि शक्यते॥ ६६॥ इति श्रीचण्डिकाशंकर
१९ संवादे निर्वाणतंत्रे सत्यलोककथनं नाम दशमः पटलः॥ १०॥ ॥ श्रीचण्डि
कोवाच॥ त्वत्प्रसादान्महादेव पवित्राहं न चान्यथा॥ इदानीं श्रोतुमिच्छामि तत्वज्ञानं
सुदुर्लभं॥ श्रीशंकर उवाच॥ तत्वज्ञानादिकथने शंकते मम मानसं॥ एतत्प्रसंग
श्रवणे विरता भव पार्वति॥ येन ज्ञानप्रसादेन विष्णुः सत्वगुणाश्रयः॥ शृणु देवि प्र रम॰
वक्ष्यामि जातो लोकपितामहः॥ तत्वज्ञानप्रसादेन शंभुः संहारकारकः॥ अन्येषु १९
का श्रेयः सर्वं ते पि त्वत्प्रसादतः॥ तत्वज्ञानं परं ज्ञानं कथं वा कथ्यते मया॥ विरता
भव देवेशि नहि पृच्छ पुनः पुनः॥ इति तस्य वचः श्रुत्वा शांकरी वाक्यमब्रवीत्॥ यदि
तत्वं महादेव न मे कथयसि प्रभो॥ प्राणत्यागं करिष्यामि पुरतस्तेन संशयः॥ श्रीशं

कर उवाच॥ शृणु देवि प्रवक्ष्यामि तत्वं परमदुर्लभं॥ श्रुत्वा गोपय यत्नेन स्वयोनि
रिव सुंदरि॥ मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च॥ पंचतत्वमिदं देवि निर्वाण
मुक्तिहेतवे॥ अवैश्वर्यं परं मोक्षं मद्यपानेन शैलजे॥ मांसभक्षणमात्रेण साक्षा
न्नारायणो भवेत्॥ मत्स्यभक्षणमात्रेण काली प्रत्यक्षतां भवेत्॥ मुद्रासेवनमा
त्रेण भूः प्रभो विष्णुरूपधृक्॥ मैथुनेन महायोगी मम तुल्यो न संशयः॥ तत्वांतर
तु देवेशि मयैव कथितं पुरा॥ माहात्म्यं वास्य धर्मस्य पुरैव कथितं मया॥ तत्वज्ञा
नमिदं कान्ते निर्वाणमुक्तिकारणं॥ एकत्र पंचतत्वानि यत्रैव मिलनं भवेत्॥ तत्रै
वाहं प्रगच्छामि तेन रामलतामाः सदा॥ सा नारी कालिकारूपा मन्ते तस्यां प्रलीयते॥
येन राः साधुरूपाश्च तत्वज्ञानपरायणाः॥ जीवन्मुक्ताश्च ते प्रोक्ता ब्रह्मरूपा न

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि·तं·
२०

चान्यथा॥ सायुज्यापि महामोक्षं नियुक्तं क्षत्रियादिषु॥ ब्राह्मणाः परमेशानि यदि
तत्त्वपरायणाः॥ सत्त्वे सत्त्वं पुनः सत्त्वे परतत्त्वे प्रलीयते॥ यथा तोयं तोयमध्ये लीय
ते परमेश्वरि॥ तथैव तत्त्वसेवायां लीयते परमो लने॥ इति ते कथितं कान्ते तत्त्वज्ञानं
विमोक्षदं॥ येन ज्ञानप्रसादेन मोक्षसिद्धिर्न संशयः॥ क्षितिं विना यथा नास्ति संस्थितेः
कारणं सदा॥ तोयं विना यथा नास्ति पासानां नाशकारणं॥ तमोहन्ता यथा नास्ति राम:
भास्करेण विना प्रिये॥ विना वह्निप्रयोगेन यथा किंचिन पच्यते॥ विना चंद्रेण देवे २०
शि सुधावृष्टिर्न जायते॥ मातृगर्भं विना कान्ते सुतोत्पत्तिर्न यथा भवेत्॥ तत्त्वज्ञानं विना
देवि तथा मुक्तिर्न जायते॥ अत एव महेशानि गोपनं कुरु यत्नतः॥ दिव्यभावयुतानां च
तत्त्वज्ञानं सदा भवेत्॥ वीरभावयुतानां वै तत्त्वसेव्यं सदानघे॥ न पशोरालये कुर्यान्न

पशोर्ज्ञानगोचरे॥ न पशोः सन्निधाने च न पशोर्दृष्टिगोचरे॥ अन्यथा पक्षिकीट
स्य दर्शनेनैव कारयेत्॥ सिद्धिर्वर्मभ्रष्टः प्राज्ञे यत्कृत्वा सिद्धिमाप्नुयात्॥ एका वा
क्तिं समानीय एकैव साधक सदा॥ पूजयेद् दृढयत्नेन पर्वते वनकौलिक॥ एवं
कृत्वा लभेत् सिद्धिं नान्यस्य दृष्टिगोचरे॥ श्रीचक्रपूजा यत्रैव तत्रैव वनसिद्धये॥
सिद्धिर्न जायते तत्र कदाचिदन्यसन्निधौ॥ तत्रैव कालं नास्ति सिद्धिर्यत्र चक्रे प्रपूजयेत्॥
आयुरारोग्यमैश्वर्यं श्रीचक्रपूजनाद्भवेत्॥ कीर्त्तिर्वृद्धिर्यशो वृद्धिर्मुक्तिभागी न
संशयः॥ वांछासिद्धिर्ज्ञानसिद्धिर्देव्याः प्रीतिश्च जायते॥ श्रीचक्रपूजायं कुर्या
त्सर्वकार्येऽव्ययः॥ अश्वमेधसहस्राणि वाजपेयशतानि च॥ इष्ट्वा यत्फलमा
प्नोति तत्फलं कौलिकार्चने॥ वापीकूपतडागादि दत्त्वा यत्फलमाप्नुयात्॥ तत्

नि·तं·
२१

फलं कोटिगुणितं यदि चक्रं प्रपूजयेत्॥ तदन्ते मेरुतुल्यं स्याद्विन्दुः सिन्धुसमो परं॥ प
र्वतं मेरुसदृशं यदि चक्रं प्रपूजयेत्॥ तन्मध्ये वर्त्तते देवि यदि व्याधियुतो नरः॥ शिववृध्या प्र
पूज्यो हि भ्रांतिं तत्र विवर्जयेत्॥ सूर्यस्य प्रतिबिम्बं च तत्तोये परिपश्यति॥ गगा तोये यथा
सूर्यहीन तोये तथा पुनः॥ सूर्यस्य दूषणं नास्ति सूर्य्यैकः परितिष्ठति॥ तथैव परमेशा
नि साधके नास्ति दूषणं॥ मन्त्राराधनमात्रेण तदा तन्मयो भवेत्॥ अत एव महेशानि
दूषणं नास्ति रेतस्मि॥ रेतः पवित्रं परमं शक्तिर्मोक्षस्य कारणं॥ दृष्ट्वा हीना च या शक्तिज राम:
पहीना च या पुनः॥ धृत्वा साधकरेतश्च सा नारी कालिका स्वयं॥ भ्रांतिरत्र न कर्त्तव्या पापी २१
मुक्तिप्रयच्छति॥ या नारी भ्रांतिसंयुक्ता आगता चक्रमण्डले॥ सप्तजन्मनि सा नारी चांडा
लीपतिवर्जिता॥ एवंरूपा च या नारी भवशोकुरुते यदि॥ धनपुत्रवर्जितश्च सर्वं उलोन

चान्यथा॥ इति ते कथितं कान्ते तत्त्वज्ञानं विमोक्षदं॥ येषां देहे महेशानि तत्त्वज्ञानं मयोदितं॥
ते पुनर्जननीगर्भे न विशन्ति कदाचन॥ जीवन्मुक्ताश्च ते शाक्ताः शिवरूपाश्च ते नराः॥ शृणु
देवि प्रवक्ष्यामि कौलिकस्य च लक्षणं॥ यस्मिन् देवे यदा वीरो निर्दिष्टो मंत्रसाधने॥ तदा वी
रो विशिष्टोऽयः कौलिकश्चैव कीर्त्तितः॥ शैवे शाक्ते गाणपत्ये सौरे वा वृषलोचने॥ तत्त्वज्ञान
मिदं प्रोक्तं वैष्णवे शृणु यत्नतः॥४८॥ इति निर्वाणतन्त्रे तत्त्वज्ञानविवरणं नामैकादशः
पटलः॥११॥ ॥श्रीचंडिकोवाच॥ शृणु नाथ परानन्द मम प्राणेश्वर प्रभो॥ वैष्णवस्य
यथा तत्त्वं तन्मे ब्रूहि जगत्पते॥ श्रीशंकर उवाच॥ शृणु तत्त्वं वरारोहे वैष्णवस्य त्रिलोचने॥
गुरुतत्त्वं मन्त्रतत्त्वं वर्णतत्त्वं सुरेश्वरि॥ देवतत्त्वं ध्यानतत्त्वं पञ्चतत्त्वं वरानने॥ तत्रादौ श्रीगुरो
स्तत्त्वं स्नेहाद्वक्ष्यामि पार्वति॥ सैतलवर्त्तिकायुक्ते देहस्थे प्रसन्ने जस॥ गुरूणां मन्त्रदानेन

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं. २२ तन्मन्त्रं दीपितं भवेत्॥ देवताया शरीरं हि जीवा उत्पद्यते ध्रुवं॥ अतएव हि तस्यात्मा दे
वरूपो न संशयः॥ ईश्वरस्य तु यद्बीजं तं देव अक्षरात्मकः॥ तेन वर्णात्मके देहं जातो देव
न संशयः॥ मन्त्रवर्णा सवर्णानी लीयन्ते परमेश्वरि॥ वर्णात्त्वमिदं देवि मम सर्वस्वरुप
मुच्यते॥ स्वयं देवो न चान्यो स्ति निर्मलो देवरूपकः॥ सर्वत्र देवता ध्यायेन् नागल्मलता
दिषु॥ ध्यानेन लभते सर्वं ध्यानेन विष्णुरूपकः॥ ध्यानेन सिद्धिमाप्नोति विना ध्यानेन सिद्ध्य
ति॥ इति ते कथितं देवि वैष्णवस्य सुरेश्वरि॥ यज्ज्ञानादमरस्त्वं च विष्णुरूपो न संशयः॥ राम: २२
यः कुर्यात्परमेशानि तत्त्वज्ञानं मयोदितं॥ स्वर्गभागी भवेन्मर्त्यो विष्णुलोके महीयते॥ य
दि न क्रियते नाम स्तोमं मत्सा चिन्तयेत्सदा॥ तेन रानहि गच्छन्ति कदाचित्सम मन्दिरं॥ इति ते क
थितं तत्त्वं वैष्णवस्य सुरेश्वरि॥ यज्ज्ञानादमरत्वं च लभते नात्र संशयः॥ १२ ॥ इति श्री

निर्वाणतन्त्रे विष्णोस्तत्त्वकथनं नाम द्वादशं पटल॥ १२॥ ॥ श्रीचण्डिकोवाच॥ स्वस्था
त्मकं दशार्णं च पूर्वैव कथितं तु मे॥ प्रकाशरूपेण तन्त्रे कथयस्व दयानिधे॥ श्रीशंकर उ
वाच॥ शृणु देवि प्रवक्ष्यामि मन्त्रं दशाक्षरं परं॥ यस्य श्रवणमात्रेण मूढोपि विष्णुरूपकः
॥ ॐ मन्त्रोपि च देवेशि शक्तिमन्त्रं जपेद्यदि॥ अज्ञात्वा तन्महामन्त्रं स भवेद् ब्रह्मराक्षसः॥ अ
ज्ञात्वा तन्महामन्त्रं तत्त्वज्ञानी भवेद्यदि॥ तथापि नरकं गच्छेदिति दिदेवस्य संमतं॥ शृणु दे
वि प्रवक्ष्यामि दशार्णं मन्त्रमुत्तमं॥ मायाबीजं वधूबीजं लक्ष्मी काली च पाशकं॥ गगनं प
क्षिबीजं च वह्निकान्तान्ततः प्रिये॥ इति ते कथितं चण्डि दशाक्षरमनूत्तमं॥ यज्ज्ञानादम
रत्वं च लभते नात्र संशयः॥ अस्य ग्रहणमात्रेण नरो नारायणो भवेत्॥ अस्य प्रसादमात्रे
ण च शिवनिर्वाणतां व्रजेत्॥ दंडोपि जपेदेतद् दशार्णं नहि पश्यति॥ इह लोके दरिद्रश्च प
रमेश्वरि॥ अस्य मन्त्रान्महामन्त्रा जायन्ते नात्र संशयः॥ सर्वे देवाः सदा रात्रौ दशार्णं जायते

नि.तं. २३ रेव ब्रह्मराक्षसः॥ तस्माद्यत्नेन देवेशि दशार्णं श्रावयेद् गुरुः॥ केवलं श्रवणं कुर्यात्तज
पेत्साधकोत्तमः॥ यः श्रावयेद्दशार्णं च स नरो गुरुरुत्तमः॥ मन्त्रदाता यथा देवि तथैव
सद्गुरुस्ततः॥ दशार्णदाता यो देवि स एव परमो गुरुः॥ यथा मरतरंगिन्या न समा सकला
पगा॥ दशार्णस्य समो नास्ति मन्त्रोपि सुरपूजिते॥ त्वत्समा यदि नारी च भक्तस्य पुरुषोस्ति
च॥ दशार्णस्य समो नास्ति मन्त्रो हि कथितं मया॥ दशाकान्तस्य स्वर्णस्य सदृशो लोहम
स्ति चेत्॥ दशार्णस्य समं मन्त्रं कथयेत् सदा प्रिये॥ श्रीप्रासादीयं मन्त्रो दशार्णः प राम: २३
रमेश्वरि॥ गुह्याम्नाये महातन्त्रे माहात्म्यं कथयामि ते॥ अतः परं प्रवक्ष्यामि यद्रूपं दंड
धारकं॥ साधुरूपो गृहस्थश्च ब्राह्मणो ब्रह्मवादिनः॥ सर्वोपायपरित्यक्तः सदा धर्मपरा
यणः॥ जितेन्द्रियो जितक्रोधः समत्वं सर्वजातिषु॥ उच्चैरपि समत्वं च समं स्वर्णं च पा

र्थिवे॥ दयाभावश्च सर्वत्र पुत्रे मित्रे रिपौ भवेत्॥ लाभालाभे जये नाशे निन्दायां पौष्टिके तथा॥
काले च शोकसंवेधं मृत्युमारम्य पुरगान्तिके॥ ब्रह्मज्ञानं विना ज्ञानं यस्य चित्ते न विद्यते॥
सन्यासधर्मनस्यैव नान्यस्य सुरपूजिते॥ सन्यासधारणं कार्यं विप्रस्य मुक्तिहेतवे॥ यो वि
प्रो धारयेद्दंडं स एव नारायणः स्वयं॥ चतुर्भुजाः प्रजायन्ते दंडधारणमात्रतः॥ सर्वलक्ष
णसंयुक्तो ब्राह्मणो गमनं चरेत्॥ गत्वा च दंडिनं दृष्ट्वा प्रणमेत् दंडवत्क्षितौ॥ त्वमेव देव
देवेश त्वमेव चारणकारकः॥ त्वमेव जगतां वंद्यस्त्वं हि मोशरणागतं॥ इति श्रुत्वा दं
डधारी प्रपृच्छेत् सादरात्मने॥ कस्त्वं कस्मात्तु तस्त्वं हि कथमागमनं वद॥ श्रुत्वा तद्वचनं
विप्रः प्रावाचाल्मनिवेदनं॥ विप्रवंशे समुद्भूतो यद्युक्तो हं विवेकवान्॥ नास्ति मे पितरौ
साक्षात्तनास्ति मे स्त्री सुतादयः॥ मृतौ च मातापितरौ मृता भ्रातादयः सुताः॥ पश्चात्स्वकी

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



नि·तं· तानाशेतुरवहमम्बन्तनायवाह्॥ अतएव च गोस्वामिन् देहिमे परमाश्रयं॥ सत्यंकु
२४ रु द्विजश्रेष्ठ यदुक्तं वै समासितः॥ मिथ्याभाषणादो वैराग्यं लवमां विवर्जितः॥ भवत्य
वनसंदेहो द्विजमन्मरतो वद॥ स्थिता यौवनावकातायापरमेश्वरि॥ सर्वहिवि
फलं तस्य यः कुर्याद्दंडधारणं॥ पितरो वियते देवि यः कुर्याद्दंडधारणं॥ वियते तथा
लभावो यस्य कौन भुक्तस्तथा॥ संन्यासधारणं तस्य तथा हि परमेश्वरि॥ एतच्छ्रुत्वापि रामः
शिष्यश्च रारवाख्यं प्रयच्छति॥ इत्यादिदृढवाक्यं तु श्रुत्वा दंडी जितेंद्रियः॥ तस्मा २४
सदानं तस्यैव दद्यात् क्षिप्रं सास्वती॥ आदौ दशाक्षरो मंत्रं प्रथमं स्थापयेद्गुरुः॥ त
च्छ्रुत्वा च महावर्मगमनं कारयेत्ततः॥ क्रोशं वा क्रोशयुग्मं वा वेगेन गमनं चरेत्॥ गुरु
णा सह शिष्येण पृष्ठे पृष्ठे विधानतः॥ तिष्ठति च महावाहो मान्यस्थानं हि गच्छतु॥ शी

घ्रः परमहंसस्त्वं त्वत्तमो नास्ति भूतले॥ क्षंतव्यमपराधं मे त्वं हि विष्णुः स्वरूपधृ
क्॥ त्वमेव जगतां वंद्यस्त्वमेव सर्वपूजितः॥ त्वमेव परमो हंसस्तिष्ठ तिष्ठ तु मा व्रज॥
सशिष्यं दंडिनां दृष्ट्वा इति वाक्यं वदेत्ततः॥ अतः स परमो हंसः पथि शेते प्रमोहितः
॥ तस्यैव दर्शनार्थाय चान्तरीक्षस्थदेवताः॥ सस्त्रीकाः सपरीवारा आयान्ति दिग्वि
दिक्षु च॥ एतस्मिन्समये दंडी शान्तयेत् शिष्यकं तमः॥ फूत्कारं वह्नौ दत्वा मंत्रेणान
न्तव्रते॥ फूत्कारे वायुयोगेन स्वप्नकः प्राणान्प्रयोजयेत्॥ जन्मांतरं तत स्त्रवणक्षणोजा
यते किल॥ जन्मान्तरं समालोक्य संस्कारमाचरेद्गुरुः॥ कुंडाग्निके समानीय अंतःप्राश
नमाचरेत्॥ अमुकस्थं समाभाव्य पृष्ठं वन्हौ विनिक्षिपेत्॥ इति नाम्नाथ संस्थाप्य म
हासंस्कारमारभेत्॥ ततोपि दंडधादि विशिष्याय ज्ञानहेतवे॥ शरणं शिष्यमहाधीर



नि·तं· महाकर्महदयं कुरु॥ जन्मान्तरं तु तस्यैव पृथिव्यानाधिकारिता॥ मृतदेहस्य रूपोयं
२५ शरीरोयं न संशयः॥ विरतो भव सर्वत्र तोयाहारं च हृत्यया॥ प्रातःस्नानेव यद्यत्नेन
स्नानं भोजनं नव॥ पंचतत्त्वं सदा सदा सेव्यं तु प्रभावे जितेन्द्रियः॥ सदैव मानसी पूजा
सदा मानसतर्पणं॥ त्रिसंध्यं मानसं यागं नाभिकुंडे प्रयत्नतः॥ सदैव मानसं भोगं
त्यागं कुरु प्रयत्नतः॥ षड्वर्गं जितो भूत्वा नरोनारायणः स्वयं॥ भवत्येव न संदेहो रामः
दंडधारणमाचरेत्॥ पितृवंशो सप्तदशमातृवंशे चयोदश॥ कांता याः सप्तमश्चैव २५
तत्स्मीनारायणो भवेत्॥ इति श्रुत्वा वचस्तस्य शिष्य एतान्ब्रवीद्वचः॥ पञ्चतत्त्वं न
चित्रकार्थं तत्करोमि निरंतरं॥ पंचतत्त्वं सदा सेव्यं कस्याभागं वदस्व मे॥ यत्रैव
वर्त्तते दंडी वज शिष्यसमाहतः॥ तत्र गत्वा प्रयत्नेन पंचतत्त्वविचक्षणा॥ अथ

वा वीरमध्ये तु यत्नेन गमनं चरेत्॥ तत्र ज्ञानिगृहस्थस्य सन्निधाने व्रजेत्किल
॥ कुद्रमं विगंतव्यं यत्र स्तकुलनायकः॥ भिक्षाचर्यां न चस्वार्थं देवतायाः कृते
पुनः॥ आचार्य मानी हस्तात् भिक्षां कुर्यात् समाहितः॥ हमात दीहि मे भिक्षां कुंड
लीं तर्पयाम्यहं॥ एवमुक्त्वा ततो दंडी महासंस्थारमाचरेत्॥ कुंडाग्निके समानीय
होमयेद्विधिपूर्वकं॥ ततो हुनेन करं धृत्वा आत्मेष्टाहुतिं पुनः॥ विपरीतं क्रमं
रौवं कुर्याद्दंडविशेषणं॥ ततः कुर्यात्प्रयत्नेन अंतर्यज्ञोपवीतकं॥ शिखां तस्य
शिखामंत्रैः पूर्णमध्ये विनिक्षिपेत्॥ मूलेन यत्नसंवेष्ठ तालिनैव निवेदयेत्॥ घ
न मूर्ति कया पूर्णं विलिप्य शोधयेत्ततः॥ ततः पूर्णं मूलमंत्रे दंडमध्ये विनिःक्षिपेत्
॥ पूर्णाहुतिं ततो दद्यात्तलं तद्गमानयत्सुधीः॥ यशस्वं सशिखाया तत्स्त्र राशौ

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.तं. २६ धयेत्प्रिये॥ मूलमंत्रं जपेन्मंत्री गणानकसहस्रकं॥ ततश्च भावयेन्मंत्री कालिकायां च
सुंदरि॥ अथवा भावयेन्मंत्री तारायाः परदुर्लभं॥ मूलमंत्रं सकृच्चार्घ्यं पूजयेत्सप्र
यत्नतः॥ भक्षणात्स्मरणात्साक्षाद्दंडीयज्ञोपवीतवान्॥ भवत्येव न संदेहो नारा
यणो भवेत्॥ विल्वदंडं समानीय वंशस्यैकं समानयेत्॥ विल्वदंडे कालिकायाः
जपेन्मंत्रं प्रयत्नतः॥ जीवन्यासं ततः कृत्वा दंडो देवीं विचिंतयेत्॥ विल्वस्थितं च वैत
न्मं वंशदंडे नियोजयेत्॥ इष्टदेवीस्वरूपेण दंडोयं परमेश्वरि॥ शिष्यस्य दक्षिणे ह- राम: २६
स्ते दंडस्य स्थानमाचरेत्॥ कमंडलुं समानीय वारुणं च प्रपूजयेत्॥ वारुणीं निक्षिपेत्त
च मूलमंत्रं ततो जपेत्॥ अष्टोत्तरशतं जप्त्वा तस्य वामकरे न्यसेत्॥ गैरिकं कौपिनं वस्त्रं
येन च परिधापयेत्॥ दंडधारणमात्रेण नरो नारायणो भवेत्॥ अथवाप्यधिमहामायां दं

डोपरि विभावत॥ गुरुपूज्यां महाकालीं दंडोपरि विभावयेत्॥ साक्षान्नारायणस्त्वं हि दया
धर्मपरो भव॥ न च माता पिता वापि सर्वे दंडान्तिके स्थिते॥ चौरवद्भ्रमणं गेहे गृहस्थस्य-
द्विजस्य च॥ नारायणः सदा भाव्य द्वारे तस्य भ्रमेत्सुधीः॥ इति कृत्वा गृहस्थश्च दंडाञ्जलिप
रो भवेत्॥ द्वारे च दंडिनं दृष्ट्वा प्रणमेद्ब्राह्मणो नरः॥ भिक्षां दद्यात्प्रयत्नेन कुर्मनो सं
विना प्रिये॥ आदाय भिक्षां देवेशि चौरवद्भ्रमणं चरेत्॥ तथाहि नगरं गत्वा त्रिरात्रं व स
तिं चरेत्॥ तीर्थभूमिं ततो गत्वा सप्तरात्रं वसेत्ततः॥ ब्राह्मणो दंडिनं दृष्ट्वा प्रणामेद्विधिपू
र्वकं॥ तोयपूर्णं च देवेशि किंवाप्यन्यकमंडलुं॥ दृष्टिमात्रेण तत्पात्रं पूर्णतोयं भ
वेत्क्रुवं॥ दद्यात्तद्यदि मोहेन स भवेद्दापराश्रयं॥ त्रिंशद्वर्षसहस्राणि वने च विटपो
भवेत्॥ इति ते कथितं चंडि सन्यासधारणे परं॥ पाषंडाय न वक्तव्यं प्राणान्तेपि कदा

नि.तं. २७ चन॥ ८० ॥ इति श्रीनिर्वाणतंत्रे त्रयोदशः पटलः॥ १३॥ ॥ श्रीशंकर उवाच॥
शृणु देवि प्रवक्ष्यामि अवधूतो यथा भवेत्॥ वीरस्य मूर्तिं जानीयात्सदा तत्त्वपरायणं
॥ यद्रूपं कथितं पूर्वं सन्यासधारणे परं॥ तद्रूपं सर्वकर्माणि प्रकुर्याद्वीरवल्लभः॥
दंडिनं मुंडनं देवि आवश्यकं समाचरेत्॥ यथा तथा नैव कुर्याद्वीरस्य च मुंडनं॥ अ
संस्कृतं च केशानां मुंडने शिकुचोद्वयो॥ अस्थिमाला विभूषा वा रुद्राक्षानथवापि-
धारयेत्॥ दिगंबरो वा वीरेन्द्र अथवा कौपिनी भवेत्॥ रक्तचंदनदिव्यांग कुर्यात्प्रसां राम: २७
गभूषणं॥ क्षमा दानं तपो ध्यानं वीरभावेन शैलजे॥ शिवोहं भैरवानन्दो मुक्तोहं कुल
नायकः॥ एवंभावपरो मंत्री हृष्टयुक्तः सदा भवेत्॥ सच्चिदासेवनं कुर्यात्सदा कारणसे
वनं॥ भवेत्साक्षात्प्रभुः शंभुरूपो न संशयः॥ निर्वाणमुक्तिमाप्नोति ब्राह्मणो वी

रभावतः॥ अवधूतश्च क्षत्रियश्च महायोगी न संशयः॥ स्वरूपोपि भवेद्वैश्यः शूद्रोपि सह-
लोकभाक्॥ संपूर्णफलमाप्नोति विप्रो निर्वाणतां व्रजेत्॥ त्रिभागफलमाप्नोति क्ष-
त्रियो वीरभावतः॥ पादद्वयं तु वैश्यस्य शूद्रस्यैकपादकं॥ ब्राह्मणस्य विना न्यत्र सन्या
सो नास्ति दंडिके॥ कुर्यान्मोहनयोन्यत्र स च पापाश्रयो नरः॥ तत्प्रभावेन देवेशि शृणु
यात्प्राणवल्लभे॥ सन्यासिनां सदा सेव्यं पंचतत्वं वरानने॥ द्वादशाब्दं देवेशि योन्याद
मतुर्नेनायते॥ सेवनानन्दविख्यातो द्वादशाब्दे सरस्वती॥ अवधूतस्य चाख्यातः शृणु
ष्व पर्वतात्मजे॥ वनारण्यभारतीत्व पुरी च गिरि रेव च॥ एकस्थाने वसेत्स्थित्वा इष्टध्याना
दिकं चरेत्॥ योमंत्रतत्त्वब्रह्मज्ञः शरणः परिकीर्तित॥ श्रेष्ठके स जटाजूटः सदा त्वचलु
वत्चरेत्॥ अन्ते योगी महावीरो हस्त्यसैव शैलजे॥ नानाशास्त्रक्रियाविज्ञो नानाकर्म

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.र्वा विशारद:॥ सदेष्टदेवीभावेन भावयेद्योगिचांगनां॥ स एव भारते वीरो महाज्ञानी
२८ जितेन्द्रियः॥ सदोद्दिवा कुर्यो वीरो मुक्तकेशो दिगम्बरः॥ स एव नमभावेन भावयेद्यो
न रोगनमः॥ इष्टदेवोविनानास्ति स वीरः परिकीर्तितः॥ नानादेवस्य पीठक्षेत्रेषु८
तीर्थभूमिषु॥ भ्रमणं कुरुते नित्यं कुर्याद्यत्नेन पूजनं॥ देवतायाः सदा ध्यानं श्री
गुरोः पूजनं तथा॥ अंतर्यागेन योतिष्ठः स वीरः पुरिरेव च॥ अवधूताश्रमो देवीय: राम:
स्य भक्तिः सुनिश्चला॥ तस्य दुःखं भवेत्का लौकिंनाहि ध्यातिस्तल॥ अवरुतंत २८
मालोक्य शाम्भुवत्पूजनं चरेत्॥ शक्तितः पंचतत्त्वानि यत्नेन च निवेदयेत्॥ पंच
तत्त्वं विनाभद्रे आनंदो नैव जायते॥ अतो हि भक्तिभावेन तेनैव पूजनं चरेत्॥ इति ते
कथितं काले अवधूतस्य लक्षणं॥ येन विज्ञानमात्रेण शिवत्वं लभते नरः॥

नि.र्वा अज्ञाय भक्तिहीनाय न दातव्यं कदाचन॥ गुरुभक्तिविहीनाय तत्त्वनिंदापराय च॥
२९ इदं तंत्रं स्वगृप्तं च प्राणान्तेपि कदाचन॥ न श्रावयेद्भक्ताय तिद्धिहानिः प्रजायते
॥ कदाचिद्विद्यास्तुष्टाय स्वशिष्याय महात्मने॥ श्रावयेद्भक्तियुक्ताय यदि तद्योग्य
ताभवेत्॥ श्रुत्वा गोपययत्नेन स्वयोनिमिव शैलजे॥ संक्षेपात्कथितं किंचित्तव राम:
मन्यथोक्तमिच्छति॥ ५६ ॥ इति श्रीनिर्वाणतंत्रे वाणिकाशांकरसंवादे अवधू २९
ताश्रमविवरणं नाम चतुर्दश: पटल: समाप्त:॥ १४॥ ५००६ ॥ ॥



CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



A.225/14 श्रीराष्ट्रिय अभिलेखालय
नेपाल
विषय: शैव तन्त्र
पुस्तक नामः निर्वाणतन्त्रम्
ल. सं. पं २१०६
बि. सं. ६३४२५
पत्र सं: २१
आकार [illegible]

NATIONAL ARCHIVES
NEPAL
Subject:
Mansccript-Name:
C. No.
S. No.
Folio. No.
Size.





नि॰तं॥

ॐ नमो गणेशाय ॥ कैलासपर्वते रम्ये नानारत्नोपशोभिते । विपरीतरता शक्ता चंडी पप्रच्छ शंकरं ॥ श्रीचंडिकोवाच ॥ निरा
कारं निर्गुणं व्यक्तं निर्द्वन्द्वं विवर्जितं । मुनित्यं सर्वकर्त्तारं वर्ण्णातीतं सुनिश्चलं । सत्तादिरहितं शांतं किमाकारं प्रतिष्ठितं । तस्मा
द्रूपात् कथं देवं शक्तिमाधारेण जायते ॥ श्रीशंकर उवाच ॥ शृणु देवि परं तत्त्वं वर्णातीतां च वैखरीं । गुणालयां गुणातीतां सकलां निर्वि
दां विवर्जितां । पूजायागार्थं देवेशि स्वयमुत्पाद्य कारिणी । येन रूपेण ब्रह्माण्डं जायते शृणु तच्छिवे ॥ आकाशात् जायते वायु
वायोरुत्पद्यते रविः रवेरुत्पद्यते तोयं तोयादुत्पद्यते भू[illegible] पंचाशत्कोटि ब्रह्म[illegible] भवेद्भुः पर्व[illegible] ब्रह्माण्डस्याधारा [illegible]
कूर्मपृष्ठे ह्यनंतं [illegible] वासुकारं [illegible] स्थिताः । [illegible] धेनु कूर्मश्च रति निरंतरं [illegible] एवमेव विशाले
नभो [illegible] पुनः पुनः ॥ श्री[illegible]डिकोवाच ॥ किमाधारस्य ब्रह्माण्डं तन्मे ब्रूहि महेश्वर ॥ सृष्टिप्रकारं तन्मध्ये किमाकारं स्थितं वद
श्रीशंकर उवाच ॥ [illegible] ब्रह्माण्डं नाना विग्रहं पार्वति । ब्रह्माण्डविग्रहे प्रोक्तं स्थूल[illegible]दिकं स्थितं । [illegible] मेरुस्तन्मध्ये
देवि तथा सप्तकुलाचलाः मूलादिमस्तकान्तं वै सुमेरुर्नाम पर्वतः स्थितो मेरोरयोभागे [illegible] भूर्लोकादिम १

हेशानि सप्तस्वर्गं क्रमेण हि । [illegible] तिष्ठंति परमेश्वरि । सत्यलोके निराकारं महाज्योतिस्वरूपिणी । सत्यलोके नि
राकारं महाज्योतिस्वरूपिणी ॥ मायया छादिता माता चनकाकाररूपिणी । [illegible] पादादिरहिता चंद्रसूर्याग्नि[illegible] । मायावल्कल
संत्यज्य द्विधा भिन्ना यदा [illegible] शिवशक्ति विभागेन जायते । सृष्टिकल्पनी । प्रथमे जायते पुत्रो ब्रह्मा सा हि पार्वति ॥ श्री
कालिकोवाच ॥ शृणु पुत्र महाधीर विवाहं कुरु यत्नतः । पुत्र श्रुत्वा ततो ब्रह्मा उवाच सादरं प्रिये । त्वं विना जननी नास्ति
शक्तिमेदे हि सुंदरी । [illegible] त्वा जगन्माता स्वदेहान्ना [illegible] हिनी देहे । द्वितीयासी महाविद्या सावित्री परमा कला । अस्याः सं
गं समासाद्य वेद विस्तारणं कुरु । अनयोः सृष्टिकर्त्ता च भवत्वं च महीतले । द्वितीये जायते विष्णुः सत्त्वगुणाश्रयः शृणु पुत्र
महाधीर तव दर्शनमत्रेण [illegible] बीजायते पुमान् कथं करोमि हे मातर्मां [illegible] हि मे शिवे । देहात्पाणिं विनिष्कृत्य दत्तोतस्य
चकालिका । वैष्णवीं महाविद्यां परमेश्वरि । तामाश्रित्य महाविष्णुः पालयत्यखिलं जगत् ॥ तृतीये जायते पुत्रो महायोगी सदा
शिवः तं दृष्ट्वा सा महाकाली तुष्टियुक्ता भवन्मुदा शृणु पुत्र महायोगी महाकार्यं हृदयं कुरु । त्वां विना पुरुषः को वा मां वि

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि: तं:

नाको पि मे मोहिनी । अतस्त्वं परमानंदं विवाहं कुरु मे शिव । एवमुक्तं गृहि हे भ्रान्त्वां विना नास्ति मे गतिः । सत्यमेकं गता
त मां विना पुरुषो भव । अस्मिन्नदेहे संसये चकरोमि च विवाहकं । कुरु देहान्तरं भ्रान्तः करुणाय दिवङ्गते । ततः स एव सा म
हाकाली दक्षे भुवनसुंदरी । नाम्ना नित्यमहायोगी सरुते मविलं जगत् । शंभु रक्ष विभागस्य शक्ति वाष्टाधिकं भवेत् । काली
काल्पा महाविद्या एतेन परमेश्वरि ॥ इतिते कथितं कान्ते यथा ब्रह्मनिरूपणं । गोपनीयं प्रयत्नेन विघ्या त्ति यथा प्रिये ॥ ० ॥
इति निर्वाणतंत्रे देवीश्वरसंवादे प्रथमः पटलः १ ॥ ० ॥ श्री चंडिकोवाच ॥ त्वत्प्रसादान्महावीर देवस्कन्दनिरू
पनं । इदानीं श्रोतुमिच्छामि क्षितौ सृष्टिर्यथा भवेत् ॥ श्रीशिव उवाच ॥ शृणु देवि प्रवक्ष्यामि यथा सृष्टिः प्रजायते । सत्यलो
के महाकाली महारुद्रस्य संपुटे नवकंठेति विख्यातं चंद्रसूर्याग्निकप्रभं । अनादिपुरुषं शुभ्रं युक्तं । तदेशा जीवसंज्ञकाः २
ज्वलदग्नेर्यथा देवि स्फुरंति विस्फुलिंगकाः । तस्मात्तु तत्परं देवि द्वंद्वं यथा भूमी पतन्त्यपि । तदेव सहसा देवि संज्ञायुक्तो
भवन्त्यपि स्थावरादिषु कोटिशः । पशुपक्षि कुशैलजे । चतुरशीति लक्ष-वैज मप्नोति सोऽव्ययः । ततो लभेत् परेशानि

मानुषं दुर्लभं तनुं । यतो मानुषदेहस्य धर्माः धर्माधिपस्य सः । ततोऽपि लभते जन्म पुनर्मृत्युमवाप्य सः । जायंते चाम्रि
यते च कर्मपाशनियंत्रिताः चतुरशीतिसहस्रेषु नानायोनिषु शैलजे श्रीचंडिकोवाच ॥ कथं वा लभते जन्म कथं भ्र
मृत्युर्भवेत्प्रभो । तत्प्रकारं महादेव श्रोतुमिच्छामि तत्त्वतः ॥ श्रीशंकर उवाच । इह यत्क्रियते कर्म परत्रैव यत्
कर्म तत्परत्रोपभुज्यते । जीवस्त एव लोकेन देहाद्देहांतरं व्रजेत् । संप्राप्य चोत्तरं देहं देहान्तरं व्रजेत् । संप्राप्य चोत्तरं देहं
देहं त्यजति पूर्वकं । इति श्रुत्वा वचो चंडी पप्रच्छ परमेश्वरं । प्राप्ते चोत्तमदेहं तु पिंडदानादिकं कथं ॥ श्रीशिव उवाच ।
शृणु देवि प्रवक्ष्यामि मायादेहं तदेव हि । मायादेहः परेशानि वायुरूपो न चान्यथा । वायुरूपो घनो देहः आकाशस्थो निराश्र
यः ततश्च पिंडदानेषु वायुः स्थिरतरो भवेत् । प्रथमे मासकं देवि जायते चक्रमावधि । ततो यमपुरं गत्वा धर्मो धर्माधि
कं क्रियतु तदर्थं वा परे किंचित् । यदा कर्म न विद्यते । धर्माः सर्वे तदा जीवः क्षययो ब्रह्मशासनं । तस्मात्कर्मी तत्त्वज्ञानं महेशानि यदि भाग्यव
वशात् यदि स्यात् दुर्लभं तनुं महाविद्यां भाग्यवशाद्यदि प्राप्नोति सद्गुरुं ।

साधयेत् । तदेव परमं मोक्षं यावद्ब्रह्मांड तिष्ठति । ब्राह्मणस्य महामोक्षं साधुत्वं क्षत्रियस्य च । साहय्यं चोरुया
तस्य शूद्रस्य सहलोकता महाविद्याप्रभावेन पुनरागमनं नहि । ब्रह्मांडनाशे तु सर्वं मुक्तं सदाशिवे । तदा सर्व
स्य निर्वाणं भवत्येव न संशयः । श्रीचंडिकोवाच । ब्रह्मब्रह्मांड वा हेतु किं पुनः परमेश्वर । तत्सर्वं श्रोतुमिच्छामि यदि स्ने
होऽस्ति मां प्रति ॥ श्रीशिव उवाच ॥ ब्रह्मांडस्य वा संदेशो ब्रह्मांडाद्बहवः स्थिताः । अनंतस्य प्रमाणं तु किं वक्तुं शक्यते म
यास एव निर्मितं सैवं सर्वं सुरेश्वरि ॥ ० ॥ इति निर्वाणतंत्रे देवीश्वरसंवादे द्वितीयः पटलः ॥ ० ॥ श्रीशिव उवाच ॥ प्रकृत्या
जायते पुंसां प्रकृत्या सृज्यते जगत् । तोयात्तु बुद्बुदं देवि यथा तोये विलीयते प्रकृत्या जायते सर्वं पुनस्तस्यां प्रलीयते । तस्मात्
प्रकृतियोगे च जायते नान्यथा क्वचित् ब्रह्मविष्णुशिवं देवि प्रकृत्या जायते ध्रुवं । तथा प्रलयकाले तु प्रकृत्या लभ्यते पुनः । ३
ख शक्तिर्वै द्विजाः सर्वे न शैवा न च वैष्णवाः । उपास्यंति यतो देवीं गायत्रीं परमाक्षरीं । गायत्रीं शृणु चार्वंगि चतुर्वेदप्रपूजि
तां वेदमातेति विख्यातां त्रिवर्गफलदायिनीं । ह्रींबीजं समुद्धृत्य नाभ्यक्षरं समुद्धरेत् । वामकर्णसमायुक्तं पुनर्नामिं समुद्धरेत्

कर्णे युक्तं मूर्ध्नि रेफं ततश्च सुरवंदिते । वारुणं रसनायुक्तं चंद्रबीजं ततः परं । सांतयुक्तं स्वर्गयुतं चैवं व्याहृतिमुद्धरेत् । कर्णे युक्तं
मूर्ध्नि रेफं ततश्च सुरवंदिते । वारुणं रसनायुक्तं चंद्रबीजं ततः परं । सांतयुक्तं स्वर्गयुतं चैव व्याहृतिमुद्धरेत् । तत्पदं च समुद्धृत्य स
वितुस्तदनंतरं वरेण्यमिति चोच्चार्य भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् प्रणवं तदनंतरं इति जप्त्वा महेशानि साक्षा
न्नारायणो भवेत् । धियो यो मध्यभागे च यकारद्वयमेव च । अत एव महेशानि अनंतस्फाति रेव च । इति जप्त्वा महेशानि शुभो भ
वति तत्क्षणात् । अंत्ययकारयोः स्थाने योकार इति यः पठेत् । स चांडालः समाख्यातो ब्रह्महा स निगद्यते । अत एव महेशा
नि तव स्नेहात् प्रकाशितं । सावित्री परमा विद्या त्रैलोक्येषु च दुर्लभा । अस्याः ग्रहणमात्रेण भूपूजेन न संशयः ॥ षडंगन्या
समंत्रयन्त्रध्यानं च प्रियंवदे । प्रणवद्वयसंपुटे भूःकारं शीर्षदेशके । भुवः शिखायां स्वःकारं कवचे विन्यसेत्सुधीः । नेत्रत्र
ये भूर्भुवः स्वः स्वःकारं करयुग्मके । नमः स्वाहा वषट् हुं वौषट् फट् क्रमतो न्यसेत् । ध्यानं शृणु वरारोहे यथा ध्यात्वा यजेत्परः
श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा । श्वेतैर्विलेपनैर्युक्ता पुष्पैरलंकारैश्च भूषिता । आदित्यमंडलांतस्था ब्रह्मलोकगता

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः। अक्षसूत्रधरा देवी पद्मासनगताथवा। ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि
गायत्र्येकपदी द्विपदी त्रिपदी चतुष्पदी नमस्ते तुरीयाय दर्शताय पदाय परोरजसे। एवं ध्यात्वा यजेद्देवीं गायत्रीं परमेश्वरीं। पु
नर्ध्यात्वा यंत्रपीठं पुष्पं दद्यात् वरानने। आदौ त्रिकोणं विन्यस्य षट्कोणं तद्बहिर्न्यसेत्। वृत्तं चाष्टदलं पद्मं तद्बहिश्च भूपुरात्मकं
चतुर्द्वारसमायुक्तं सावित्रीयंत्रमुत्तमं। जीवन्यासादिकं कृत्वा पूजयेत्तां त्रिवर्गदां। हालाहलादिकं मंत्रं स्मरन्तो परमेश्वरि।। स
मुच्चार्य्य वदेत्पाद्यं सावित्री इत्युतं पुनः। त्यागात्मकमनुः पश्चात् यथाविभवविस्तरैः पूजयेद्बहुयत्नेन चान्यथा ब्राह्मणः स्मृतः
द्रव्याभावे वरारोहे पाद्यार्थे हृदकात्मकैः पूजयित्वा यजेद्देवीं गायत्रीं परमाक्षरीं। दशभिर्जन्मजनितं शतेन च पुराकृतं।
त्रियुगं तु सहस्रेण गायत्री हंति पातकं। ॐ भो हंस्वरवदनोत्पन्ना विष्णोर्हृदयसंस्थिता। ब्रह्मणा समनुज्ञाता गच्छ देवि यथेच्छ
या इति मंत्रं समुच्चार्य देव्या वामकरे पुनः। समर्पयेज्जपफलं ततस्तोत्रादिकं पठेत्। विधिवज्जपसंजापेन पुरश्चरणमीरितं। तद्द ४
शांशेन पश्चात् पुरश्चरणसिद्धये। होमयेत्तद्दशांशेकं तर्पणं तद्दलं ततः तर्पणे। अभिषेकं तद्दशांशेकं कुर्याद्ब्राह्मणभोजने

२ भूलोश्चन्द्रोदरेतथा

ततः सिद्धो भवेद्देवि त्रिवर्गफलसाधिनी। माहात्म्यं चास्य मंत्रस्य चतुर्वेदैश्च भाषितं। अपामार्जनमंत्रस्य प्रकारं शृणु पार्वति
भूमौ शिरसि चाकाशे आकाशे भूमिमस्तके। श्रीपार्वत्युवाच।। मूर्द्ध्नि भूमौ तथाकाशे यजुर्वेदे सुरेश्वरि। सामाथर्वणि देवि विक्र
वे ऋग्वेशे लज्जे। शून्ये शिरसि चाचरणं भूमौ शून्ये तथा मूर्द्ध्नि वा पमार्जनमाचरेत्। आपोहिष्ठेति यं मंत्रा अष्टाक्षरपदे तनु। मार्ज
नं यत्क्रमेणैव सर्वपापविनाशनं। व्यतिक्रमेण चार्वंगि ब्रह्महत्यापदे पदे। अतएव क्रमं सर्वं तव स्नेहात् प्रकाशितं। स्कनिच
कवचं देवि पठित्वा प्रणमेत्सुधीः।। श्रीपार्वत्युवाच।। तुरीयधामयोर्देव यद्रूपं परमात्मनः वद। शिवः पद्मस्थिते वा येनमस्का
रः कार्यं भवेत्।। शिव उवाच।। शिवः पद्मे महादेवस्तथैव परमो गुरुः। ततस्समो नास्ति देवेशि पूज्यो हि भुवनत्रये। यद्रूपं चिंतयेन्मं
त्री वा श्रीगुरुचतुष्टयं। तद्दशाभावसंभूता ये चान्ये गुरवो जनाः। तथैव ब्राह्मणाः सर्वे चांशावतारसंस्थिताः। तथैवं वा स्वेचे
ताश्च प्रत्यक्षे भावयेत्तरां। सहस्रारे महापद्मे तदा चिंतां विवर्जयेत्।। प्रत्यक्षदर्शने देवि चास्येतद्ब्रह्मचिंतनं। नमस्कारादि
कं देवि कुर्यात्साधकसत्तमः। एभ्यो दर्शनमात्रेण नमस्कारादिकं चरेत्। न कुर्याद्यदि मोहेन सभवेदापदाश्रयः। ब्राह्मण

दीन समालोक्य ब्रह्मचारी यतित्रयं। दृष्टिमात्रेण गिरिजे प्रणमेद्दंडवद्भुवि। महापातकयुक्तोऽपि मुक्तो भवति तत्क्षणात्।।
न कुर्याद्यदि मोहेन महापातकवान् भवेत्। रक्तवस्त्रं समालोक्य तथा भस्मांगभूषणं। दंडहस्तं त्रिशूलं च दृष्ट्वा प्रदक्षिणत्रयं
प्रकुर्यात्साधकः श्रेष्ठस्त्वन्यथा पातकी भवेत्।। ० ।। इति निर्वाणतंत्रे तृतीयः पटलः।। ३।। ०।। देव्युवाच।। संन्यासी कीदृशो नाथ
अवधूतस्तु कीदृशः। कीदृशो वा ब्रह्मचारी गृहस्थो वा शिव कीदृशः। शिव उवाच।। दिव्यं प्रकाशकं मूर्त्तिं चिंतयेद्दंडधारिणं। वीर
स्य मूर्त्तिं देवेशि भस्मभस्मांगभूषणं। कौलिकस्य गृहस्थस्य मूर्त्तिं तद्ब्रह्मचारिणं। गृहस्थस्य दिव्यमूर्त्तिं चंदनादिविभूषितं।।
सर्वथापि तद्रूपोऽसौ गृहस्थः साधुरूपकः। शृणु देवि प्रवक्ष्यामि ब्रह्मांडलक्षणं। मेरुपर्वतमध्ये स वै देवाश्रयं प्रिये। महा
वीरानदी तत्र मध्यदेशे सदा स्थिता। सुमेरोर्द्देशे तु सत्यलोकं वरानने। अधोभागे महेशानि प्रतिष्ठंति रसातले। एवं क्रमेण मेरुमध्ये
भुवनानि चतुर्दश। पातालसप्तकं स्वर्णं ब्रह्मपद्मं महेश्वरि। अधोवक्त्रं हि नतपद्मं धीरा मध्ये चतुर्दले पद्ममध्ये वीजकोषेसि ५
तिचक्रं मनोहरं। वलयाकाररूपेण समुद्राः सप्त मे स्थिताः। जंबूद्वीपं मध्यदेशे चतुष्कोणं मनोहरं वलयाकाररूपेण समुद्राः

सप्तमे स्थिताः। त्रिकोणं मदनागारं कंदर्पेश्वाधिदेवता। यद्रूपं हि लं वीजं गजेंद्र वाहनं शिवे। त्रिकोणे मदनागारे लिंग
रूपो महेश्वरः। माया शक्तिर्महेशानि भुजगाकाररूपिणी। तयैव वेष्टितं लिंगं सार्द्धत्रिवलयाकृति। लिंगविद्रं स्वरक्तेन समास्ता
य स्थिता सदा। ऐंद्रं वीजं वरारोहे लिंगस्य वामदेशके सुसिद्धं ब्रह्मसदनं नादोपरि सुसुंदरं। तत्रैव निवसेद्ब्रह्मा सृष्टिकर्त्ता प्रजापति
वामभागे वसावित्री वेदमाता सुरेश्वरि। तयोः प्रसादमासाद्य सृष्टिं वितनुते सदा। यद्रूपं ब्रह्मसदनं तत्क्षेत्रं यतीन विस्मृतं। तत्स वै पर
मेशानि ऋग्वेदस्वरूपयोदितं। त्रिकोणे परमेशानि विषष्ठितीर्थकोणमुत्तमं। तदेव परतः प्रोक्तं सर्वदेवाश्रयं हि तत्। त्रिकोणं नभ
धोतद्बाले पश्य पूर्वं वरानने। स्थावरं पर्वतं पुरं कीटं पशुमनुष्यकं। स्वर्गं नरकं देवेशि नास्ति कौ पृथिवीतले। त्रिकोणं च वाह्ये
देवेशि पर्वतं बहुरूपकं। नीलाचलं मंदरं च पर्वतं चंद्रशेखरं। हिमालयं सुवेशं च मलयं भस्मपर्वतं। चतुष्कोणे वसेद्देवि तथैव
दानवाचलं। तृणगुल्मलतावृक्षा नानारूपाणि तत्र वै। जायन्ते च म्रियंते च पूर्वोक्ते नैव वत्मनो।। ० ।। इति श्रीनिर्वाणतंत्रे चतुर्थः पटलः।। ४
श्रीशिव उवाच।। शतपत्रस्य ऊर्ध्वदेशे भीमाख्यं पंकजं शुभं। पत्रषट्कं तथा वृत्तं चतुर्द्वारविभूषितं। पद्ममध्ये वीजकोषे मुक्तौ कं म

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



मोहनं । सिंदूरशङ्खसंकाशं चक्रं नेत्रेशोभितं सदा । सिंदूराकृति चास्त्रेण निर्मितं चक्रपाणिना । तस्योर्द्धे निवसेद्विष्णुः श्रीकालीपा
मदक्षिणे । ब्रह्मपादास्तुवन्ति लोकाः । पाल्यते चक्रपाणिना । वैकुण्ठनाम तत्स्वर्गं नानादेवालयं हि तत् । वैकुण्ठस्य दक्ष
भागे तु गोलकं सर्वमोहनं । तत्रैव राधिका देवी द्विभुजं मुरलीधरं । नारदाद्यैर्मुनिगणैः शोभितं वेदपारगैः । वैकु
ण्ठसदृशस्थाने भवन्ति ज्ञानिनश्च साधकाः ॥ अत्र मध्ये तथा बाह्ये यथा सर्वे प्रपश्यन्ति । तथैव भूमिभागाः सर्वे ज्योतिर्मयाः
पश्यन्ति । नेत्राभोगयुताः सर्वे नानारत्नविभूषिताः । इन्द्राद्याः … सर्वे निवसन्ति हि तत्र वै । महासत्त्वमयं लो
कं वेदवाक्यविराजितं ॥ पीताम्बरं शान्तमूर्त्तिं वनमालाविभूषितं । एवं भक्तजनं सर्वं वैकुण्ठे चोपशोभितं । विष्णुमायां वि
ष्णुभानं वैष्णवं विष्णुरूपकं । विष्णुगानं विना नास्ति वैकुण्ठे परमेश्वरि । यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके । ज्ञाने
वा चाक्षिषि किं वा ध्यानयोगेन विद्यते । शुद्धसत्त्वमयं देवि नानादेवैश्च शोभितं । तत्रैव भाति कैलाशं तत्रैव ब्रह्मपुरं । वै ए
कुण्ठनगरं तत्र तत्रैव रविरालयः । चन्द्रमयादि तत्रैव कन्दर्पनिलयं प्रिये ॥ सर्वदेवालयं तत्र देवकन्याभिः शोभितं । मध्यदे

शे गोलकाख्यं श्रीविष्णोर्भोगमन्दिरं । श्रीविष्णोः सावरूपस्य … चिन्तितं । तस्य स्थानस्य माहात्म्यं किं मया
कथ्यतेऽधुना ॥ यत्रैव सततं भाति द्विभुजो मुरलीधरः । निराकारो महाविष्णुः साकारोऽपि स गोलके । यदा साकाररूपोऽसौ
तदैव मुरलीधरः । तदा सह मया विष्णुर्वने पाति निश्चितं । वेलवस्य महानादं यत्र च पञ्चमं स्वरं । इति स्थानस्य माहात्म्यं
संक्षेपेन मयोदितं । विस्तारेण न शक्नोमि जन्मान्तरशतेन च । बीजकोषस्य बाह्ये तु वेष्टितं तोयमण्डलं । प्रमाणं सुन्दरं तो
यं पयसो दसागरं । धूम्रज्योतिराकारं कोटिचन्द्रसमप्रभं ॥ वलयाकाररूपेण शुभ्रं तोयमण्डलं ॥ … दिसवितः
सर्वा तत्रैव भासि सुन्दरी । इन्द्रादिदेवताः सर्वे स्तवमाना निरन्तरं । गन्धर्वक्षेत्र नागादि कुष्माण्डभैरवा स्तथा । नानासुखवि
कुर्वंति लासेन सदा चैकाग्रचेतसा । विष्णुशानं परां भक्तिं स्तुतिभक्तिपरायणाः । वेदगानं प्रकुर्वन्ति चतुर्वक्त्रेण वेधसा । वेदगानं च
प्रकुर्वन्ति मानवा दिव्यसद्गणाः । षडङ्गिरा … नीनथा वेदगानेन भावेन मूर्तिमन्तः सदैव हि । ध्यानं च तत्र … गा
नं सदा प्रिये । भक्ताकेन सदा … वसन्ते न सदाशिवः । … सर्वे नित्यसा । … श्रीरागेन तथा



शिवे । निर्दिष्टं पाठमेतत्तु अनिर्दिष्टमतः परं । तत्रैव वर्ततेरागाः सहस्राणि च षोडश । तत्रैव भाति मालाश्च सहस्राणि च षोडशाः
शरीरे मुरलीगानात् सर्वमालाः प्रजायते । तेन तालेन रागेन सदा गोचरवेधसः । मत्कृतागत्य विभागं हि कुर्वन्ति श्रमयोजनाः । वसन्ता
पार्श्वके नवः तिष्ठन्ति तत्र सततं । नानाकुसुमप्रसूनेन भावितं मुरलीधरं । तत्रैव राधिका देवी नानासुखविलासिनी । वदति मुरलीगा
नं कुरुते च प्रमोहनं । येन शब्देन कामस्य उत्पत्तिर्जायते सदा । तद्रूपं चैव तत्रालंकुरुते गानैः प्रपन्नतः । स्तवमाने स्वसंपूर्णा रतिविराजि
लासिनी वामभागे सदा निराधिकी भक्तवत्सला । प्रार्थनेन प्रकुर्वन्ति राधिका भक्तिसंयुता ॥ श्रीराधिकोवाच ॥ नवभक्तिप्रम
ले भर्ता श्चाथवा भक्तिसंयुता । गोलोकस्थं महाविष्णुं द्विभुजं मुरलीधरं । सदानन्दघनं देवं । भक्तसंगे विराजितं । एवं ध्यायन्ति ये भक्ता
पापं च कीदृशं । तत्तदर्शं विशेषेण यथाहं तव वच्मि । श्रीभगवानुवाच ॥ ये यथा मां प्रपद्यन्ते तेन मार्गेण … दास्यादि … पा ७
वैभि सदा त्वं भक्तवत्सला । आदेशं तावन्ततः कुरु … नित्यं च मानवाः तेषां … तत्र दास्यादि … न संशयः । गुरुरूपेण
भावमार्गेण मे भक्तिमार्गेण चैव हि । ये जना मां भजन्त्येव । तेन … सदा । या नारी साम्यभेदेन भजति पुरुषं सदा । व सम सोस

दानारी सायं ते नागतांशयः । भक्तपापा यथवा भक्त्या । तद्रूपं नित्यगलं यदि । नवभक्त्या प्रदास्यामि सकृन्निश्चयेन राधिके । सार्धं
सत्यं पुनः सत्यं सत्यं सत्यं च राधिके । तद्भक्त्या नैव गच्छन्ति कदाचिन्मम मन्दिरे । इति श्रुत्वा सा देवी राधिका भक्तवत्सला ।
चांके शेते महाविष्णोः कामबाणेन पीडिता । विष्णुलोकमिदं देवि चापरं श्रूयतां ततः ॥ ० ॥ इति निर्वाणतन्त्रे … मः
पटलः ॥१०॥ श्रीशंकर उवाच ॥ एतत्त्वं च स्याद् देवी महापुण्यं शुभं लिंगं । द्वात्रिंशत्पत्रं नीलवर्णं जलं कुण्डकम्पफणैः
सर्वद्रेश्च पंकजे चातिशोभितं । तस्याधो बीजकोषं च सदेव मेघवाहनं । रुद्रालयं तु तत्रैव महामोहस्थानं । भद्रकाली
महाविद्या वामभागेन शोभिता । भद्रकाली महाविद्या सदा संहारकारिणी । ब्रह्मा यत्र सृजत्येको लोकाः पाल्यन्ते विष्णु
विराण परदेवो रुद्ररूपः सदा संहारकारकः । संहरेत् तु रुद्ररूपेण भद्रकालिकया सह । रुद्रस्य भावनाद्धि किं सिद्धिनिधिर्दि
यद्रूपे कथितं पूर्वं गोलकं सर्वमोहनं । तस्माद्विगुणितं भावे रुद्रलोकं चतुर्गुणं । रुद्रलोके महास्वर्गं गोलोकादि चतुर्गुणं ।
महामोक्षप्रदं नित्यं रुद्रं सङ्गभूषणं ॥ भद्रकाली महाविद्या रुद्रस्य वामपार्श्वके । विष्णुना पाल्यते यत्र काशीस्थाने …

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतःकालीमहादेवीं सदैव मुरलीधरः। आराध्य बहुयत्नेन वैकुंठाधिपतिर्भवेत्। गोलोकाधिपतिर्देवि स्वकीनिभक्तिपरा
यणः। कालीपादप्रसादेन सम्भवेत् लोकपालकः। लोकानां रक्षणार्थाय सत्त्वी कोमुरलीधरः। समाराध्य भद्रकालीं गोलोके
निवसेत् सदा प्रसादे कालिकायांश्च जयते विष्णुना सदा। तत्रस्थपालको विष्णु महासत्वपराक्रमः॥ ०॥ इति श्रीनिर्वाणतं
त्रे षष्ठः पटलः॥ ६॥ ०॥ श्रीशिव उवाच॥ एतत्पद्मस्योर्द्ध्वदेशे विमलं पद्मसुंदरं। शोभितं द्वादशैः पत्रैः शोणं बंधूकसन्निभं। वांछि
तातिरिक्तफलदं शुद्धसिंदूरसोदरं। पद्ममध्ये बीजकोषे षट्कोणमंडलं शुभं। मंडलस्य मध्यदेशे वायुबीजं मनोहरं। सजी
वं वायुबीजं च वेदबाहुविराजितं। लोकत्रयस्य इशाने ईश्वरं सर्वपूजितं। या विद्या भुवनेशानी त्रिषु लोकेषु पूजिता। ईश्व
रस्य वामभागे सा देवी परितिष्ठति। महर्लोकमिदं भद्रे पूजास्थानं सुरेश्वरि। अतीव मान्यं संयामं कुरुते योगवित्तमः। सिंधूरारक्त
वर्वेगि स्फाटिके निर्मितं यतः तत्रस्थमानवाः सर्वे पीतवर्णं पश्यंति। सर्वावयवसंयुक्ता देवाकीर्णं ततिसंततिं। भूमिगाः
पश्यंति चक्राकारं हि तेजसं। स्वर्लोकगामिनः सर्वं भाकारं पश्यंति। अमेदं न पश्यंति स्थूलरूपनिरीक्षणं॥

यथैव भूमिगाः लोकाः प्रचरंति महीतले। तथैव देवताः सर्वे स्वर्गे तिष्ठंति पार्वति। भूर्लोके निवसेद् ब्रह्मा भुवर्लोके जनार्द
नः स्वर्लोके निवसेत् शंभुः पदानां कारकः। ब्रह्मादीनां च ईशानः सर्वकर्ता च ईश्वरः। सर्वस्वामी स्वरूपश्च सर्वकर्ता सु
रेश्वरः। सृष्टिस्थितिलयादीनां कर्ता च जगदीश्वरः। गोलोके कथितं सर्वं यद्रूपं साक्षिणं सदा। तस्मात् शतगुणं देवि स्वर्ल
र्लोकं सुसुंदरं। विस्तीर्णं च शतगुणं सर्वं शतगुणं शिवे। महर्लोकस्य माहात्म्यं किं वक्तुं शक्यते मया। गोलोकस्य शतगुणं
महर्लोकं सुसुंदरं। विस्तीर्णं च शतगुणं सर्वं शतगुणं शिवे। महर्लोके वसेत् सोऽहि सामान्यभावतत्परं॥ तस्माद् वरांशं गोले
गोलोके मुरलीधरं। तत्स्थाः प्राप्य सहसा स्वयं तत्पद्मयोनिना। तदाज्ञया याति लोकान् हि कुर्वन् मुरलीधरः। एवं हि रुद्ररूपेण सं
हारत्यखिलं जगत्। सर्वकर्ता च देवेशि अनंतः सपरमेश्वरः। ईश्वरः सर्वकर्ता च निर्गुणश्चाचलः शिवः। भुवने
शीं विना देवी स्थातुं नहि शक्यते। पंगुपादः पद्मेशः। गमितुं नहि शक्यते। भुवनेशीसमाराध्य सर्वस्वामी च

ईश्वरः॥ अत एव महेशानि तथैव मोक्षदायिनी। विश्वमाता च सा देवी। विश्वपावनकारिणी। सा सदा सर्व
लोकानां मुक्तिदा विश्वमातृका। भुवनेशीं विना ईशः किंचित्कर्तुं न शक्यते। अत एव महादेवी मोक्षदा विश्वमा
तृका। भुवनेशीं विना ईशः कथितं किंचिन्महर्लोकस्य लक्षणं। समासेन परेशानि अथान्यत् शृणु सादरं॥ ०॥ इति नि
र्वाणतंत्रे सप्तमः पटलः॥ ७॥ ०॥ श्रीशंकर उवाच॥ अस्योर्द्ध्वे निर्मलं पद्मं सर्वमोहस्य कारणं। षोडशैः पत्रकैर्युक्तं मो
हांधकारनाशनं। धूम्रमध्ये यथा वह्निः तथा ज्योतिर्मयं प्रिये। पद्ममध्ये वराटे च जनलोकं सुसुंदरं। महामहांधशमनं त
डिद्वैद्युतमंडलं। देवैर्वंदैर्गंधर्वैश्च मुनिभिः परिसेवितं। गोलोकस्य लक्षगुणं इहस्थानं सुदुर्लभं। देवत्वं च मनोज्ञं च विस्ती
र्णं च तथा पुनः। सर्वं लक्षगुणं देवि गोलोकान्नात्र संशयः। बीजकोषे महीन्द्री षट्कोणं यंत्रमुत्तमं। यंत्रमध्ये च वसवं महा
सिंहार्द्धदेहकं। तस्योपरि सदा गौरी दक्षभागे सदाशिवः। त्रिनेत्रं पंचवक्त्रं च प्रतिवक्त्रे त्रिलोचनः। विभूतिभूषितांगश्च स्वज
टाबलसादरः। व्याघ्रचर्मधरो देवः फणिमालाविभूषितः। लोकानामिष्टदाता च लोकानां भयनाशनः। लोकानां मुक्तिजनको

लोकानां ज्ञानदायकः। आराधकस्य ब्रह्मत्वं दायको विष्णुपूजितः। सर्वानंदकरो देवो अर्द्धनारीश्वरो विभुः। क्वचित् ज्योतिर्मयो
देवः क्वचिदाधारवर्जितः। देवानां पूज्यरूपश्च देवानां स्वामिरूपकः। भक्तस्य मुक्तिदो नित्यो विष्णुत्वदायकः प्रभुः। विष्णुपत्नैः पू
जकस्य। निजसायोज्यदायकः। गोलोकाधिपतिं कृत्वा भक्तेभ्यः प्रतियः शिवः। तस्य देवस्य माहात्म्यं किं विस्तरेण चंडि
के। या गौरी लोकमाता च शंभोरर्द्धांगधारिणी। त्रिगुणा सा महागौरी गुणैकेन पिनाकधृक्। तस्याः संगं समासाद्य सर्वकर्मा स
दाशिवः॥ ०॥ इति निर्वाणतंत्रे चंडिकाशंकरसंवादे अष्टमः पटलः॥ ८॥ ०॥ श्रीशंकर उवाच॥ एतत्पद्मस्योर्द्ध्वदेशे ज्ञानपद्मं सुदु
र्लभं। पत्रत्रयसमायुक्तं पूर्णचंद्रस्य मंडलं। पद्ममध्ये बीजकोषे स्मरेच्चिंतमणिपुरीं। तन्मध्ये नवकोणं च यंत्रे परमदुर्लभं। श
भुबीजं हि तं मध्ये साकारं हंसरूपकं। हंसः परब्रह्मरूपः साकारः शिवरूपकः। तावश्च ऋग्वेदरोहे निगमागमपक्षवान्। शिवश
क्तिपदद्वंद्वे बिंदुत्रयविलोचनं। विहारश्चास्य हंसस्य हेमपंकजपूरिते। एवं हंसो मनिद्वीपेन स्वकोऽपि परः शिवः वामभागे सिद्धिका
ली सदानंदस्वरूपिणी। तस्याः प्रसादमासाद्य सर्वकर्ता महेश्वरः। तपोलोकमिदं भद्रे सर्वलोकस्य दुर्लभं। यत्र ब्रह्मादयो देवा ध्या

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

...से । मनसा । पिन लभ्येत योगेन तपसा नच । तपोलोकं गोलोकस्य चतुर्लक्षगुणं शिवे । ब्रह्मलोके वयं देवा ।
वैकुंठे ये सुराः सुरा । ...लोकं च सेजनं नै भक्तिपरायणाः । तपसा पिन लभ्येत तपोलोक मतः शिवे । तपलोकस्य मानाम्बिलो
क मध्ये सुलोचने । गोलोकस्य महिमा लेखि । साकल्यं जनलोकके । साधुर्यं तपलोकेषु निर्वाणं हि तदूर्ध्वके । ततो ब्रह्मादयो देवा
तपोलोकार्थिनः सदा । तस्य लोकस्य माहात्म्यं मया वक्तुं न शक्यते । इति ते कथितं कांते स्वर्गलोकस्य लक्षणं । यज्ज्ञानादमर
त्वं च जीवन्मुक्तस्य साधकः ॥ यज्ज्ञानाज्जननीगर्भे न विशति कदाचन । आयुरारोग्यमैश्वर्यं संप्राप्नोति न संशयः । पुराणानि च
सर्वाणि तन्मध्ये कानि पार्वति । एतद्धि पंचतन्त्रमध्ये च तत्परो न विद्यते । गूढज्ञानं च तन्मध्ये अतः किंचिन्न बुध्यते । एवं हि वेदशा
स्त्रपुराणमध्ये सुलोचने । गूढज्ञानं परो नास्ति अतः किंचिन्न बुध्यते । अष्टादशपुराणानि शास्त्राणि च ये नराः तस्य स्थाने पुराणा
नि सर्वाणि च ... तन्त्रं ... पापाधिकेन श्रोतव्यं कदाचन । शास्त्रस्य लक्षणं ... व्याख्याचान्यत्र प्रकाशते । शास्त्रं ब्रह्म १०
स्वरूपं ... हि निर्गतः । संदेहो नैव कर्तव्यो यदि शुक्तिं प्रयच्छति सिद्धान्तं पापमोक्षायाति ... सह ... निर्मलं ततः

महाभक्ति ... सर्वपापैः ... मुक्तो ... तांत्रिकं यदि । तदा मुक्तिमवाप्नोति सत्यं सत्यं न संशयः ॥
अष्टादशपुराणानि श्रवणेन च यत्फलं । मेरुतुल्यसुवर्णानि ... ब्राह्मणेभ्यो ददाति । ... परमेशानि । सप्तद्वीपा
वसुंधरा । प्रदद्यात् भक्तिभावेन यदि स्यादुदया ... । तस्माद्धि परमेशानि । सततं बहुविधं स्मृतं । अस्मिन् तन्त्रस्य चाविशि
ष्टे ... यदि । तत्क्षणात् कोटिगुणितं । फलं समलभेद्ध्रुवं ॥ ० ॥ इति श्रीनिर्वाणतन्त्रे नवमः पटलः ९ ॥ ० ॥
श्रीशंकर उवाच ॥ ज्ञानपद्मस्योर्द्ध्वदेशे सहस्रदलपंकजं । अधोवक्त्रं महापद्मं सुमेरोर्मूर्द्धि संस्थितं । यस्य पत्रं महेशा
नि सर्वशक्तिसमन्वितं । शुक्लं रक्तं तथा पीतं कृष्णं हरितमेव च । विचित्रं चित्ररूपेण नानावर्णेन शोभितं । शुक्लं क्षणात्तु
क्षणाद्रक्तं क्षणे पीतं सुशोभनं । कस्मिन् क्षणे शुक्लवर्णं हरितं वर्णमुत्तमं । चित्ररूपं च वा देवि धन्ये कस्मिन् क्षणे प्रिये ।
एवं नानाविधैर्देवि तत्पद्मं शोभितं सदा । यथैव गोलोकधाम प्रतिपत्रे तथैव च । गोलोकाधिपतिस्तत्र भक्तिभावपर
रायणः । कैलासाधिपतिर्देवि ध्यानयोगे सदाभ्यसेत् । एवं ब्रह्मादयो देवा इंद्राद्याश्च दिगीश्वराः । स्तुतिभक्तिपराः सर्वे दि

व्यभावैः सदा स्थिताः । लक्षलक्षं महेशानि तत्रैव भुवनेश्वरी । तत्लक्षं शिवं तत्र ब्रह्मलक्षशतं प्रिये । प्रत्यहं परमेशानि
ब्रह्मांड वर्तते भवेत् । तन्मध्ये तन्मध्ये स्थापयेद् ब्रह्मा तन्मध्ये कमलापतिं । शिवं बहुविधाकारं तत्रैव स्थापनं चरेत् ॥
महामनोज्ञशोभनं । तदूर्ध्वे चंद्रमंडलं । देववृन्दैर्गंधर्वैश्च मुनिभिः परिशोभितं । गोलोकस्य लक्षगुणं इन्द्रस्थानेन्दुवल्लभं
देवत्वं च मनोज्ञं च विस्तीर्णं च तथा पुनः । सर्वलक्षगुणं देवि गोलोकान्नात्र संशयः । वीजकोषमणिद्वीपे ... क्षणेनेत्रमु
त्तमं । यत्र मध्ये च वर्त्तते महासिंहासने दशकं । तस्योपरि सदा गौरी दक्षभागे सदाशिवः । त्रिनेत्रं पंचवक्त्रं च प्रतिवक्त्रे
त्रिलोचनः । विभूतिभूषितांगश्च रजताचलसोदरः । व्याघ्रचर्मधरो देवः फणिमालाविभूषितः । लोकानामिष्टदाता
तु लोकानां भयनाशकः । लोकानां मुक्तिजनको लोकानां ज्ञानदायकः । आराध्यकस्य ब्रह्मत्वं दायको विष्णुपूजितः
सर्वानंदकरो देवो अर्द्धनारीश्वरो । कचिज्ज्ञाति नर्मयो देवः ... विदाधारवर्जितः । देवानां पूज्यरूपश्च देवानां स्वामिरूपकः
भक्तस्य मुक्तिदो नित्यो विष्णुत्वं दायकः प्रभुः । बिल्वपत्रैः पूजकस्य निजसायोज्यदायकः । गोलोकाधिपतिं कृत्वा ... ११

एवं हि परमेशानि नानाशक्तिं प्रविन्यसेत् । प्रतिब्रह्मांडमध्ये तु ब्रह्मादिदेवतात्रयं । नानाशक्तियुतं कृत्वा ब्रह्मांडं स्थाप
येत् । ब्रह्मपद्मे पृथिव्यां तु वर्त्तते मानुषादयः । ते सर्वे हि विब्रह्मांडात् तन्मध्ये भुवनानि च । पातालसप्तकं तत्र तत्रैव स्वर्गस
प्तकं । एवं क्रमेण सर्वदेशे भुवनानि चतुर्दश । प्रतिरूपं परेशानि ब्रह्मांडं नात्र संशयः । कथितं वा प्रदेशस्य ब्रह्मांडस्य लक्षणं ।
तन्मध्ये वर्त्तते साक्षाद्भुवनानि चतुर्दश । तदेव विग्रहं देवि महाब्रह्मांडमध्यगं । एवं बहुविधं देवि तत्र ब्रह्मांडके स्थितो । ब्रह्माण्ड
उये सर्वे तिष्ठन्ति शरीरिणः । पृथिव्यां तेपि वर्त्तन्ते जनाराकारविग्रहाः । महाब्रह्मांडमध्ये तु बृहद्ब्रह्मांड तिष्ठति । तन्मध्ये जन्तवो
देवि तन्मध्ये भुवनानि च । ... मार्गेण भेदोस्ति ... भेदकः । महाब्रह्मांडके यद्यत् प्रकारं परमेश्वरि । तत्तत्सर्वो हि
देवेशि बृहद्ब्रह्मांड मध्यतः । तेन रूपेण तन्मध्ये भुवनानि चतुर्दश । स्थानं बहुविधाकारं सर्वदेवस्य चाश्रयं । तन्मध्ये सत्यलो
कं च महाभास्करकारणं । दशकोटि तेन स्वर्णेन निर्मितं चक्रपाणिना । दिक्षु तोयमंडलं च । यथा पूर्णेन्दुमंडलं । परितः पारिजात
निमध्ये कल्पद्रुमं ... नः । कल्पवृक्षस्य निकटे ज्योतिर्मन्दिरमुत्तमं । उद्यदादित्यसंकाशं चतुर्द्वारसमाक्रान्तं । गंधपुष्पैरलं

CC-0. Nepal Sanskrit Academy, Kathmandu



लंकृतं। तन्मध्ये वेदिकां देवि रत्नसिंहासनं प्रिये। महाकालीपरं मौ माव नकारकाररूपतः ॥ मायया शादितात्मानं तन्मध्ये सूक्ष्मभा
गतः। महारुद्रः सएवात्मा महाविष्णुः सएव हि। महत्ब्रह्म स एवात्मा नाममात्र विभेदनः। एवं मूर्द्धि स्त्रियो नाम्नि ब्रह्म विष्णु महेश्व
राः नानाभावे मनोयस्यात स्यमेस्तानं विघते। ब्रह्मांडस्तत्र आयते। लक्षः नसंपुलोचने। तत्र ब्रह्मा तत्र हि विष्णु रुद्रः पृथिव्यसेन। एवं ब्र
ह्मांड निर्माणं कृत्वा विष्णुः सनातनः। स्वजीवं मूर्त्ति निर्माय यथा अंशस्व विग्रहं। एवं ब्रह्मांड विविधं नित्यं सृजति निर्गुणः। निर्गुणो वि
ह्मांड निर्माणं कृत्वा विष्णुः सनातनः। केचिद्वदन्ति स ब्रह्मा केचिद्विष्णुः प्रकथ्यते। केचिद्रुद्रा महापूर्वं एको देवो निरंजनः। आद्याशक्ति
दुरूपश्च सिद्धिः कारणमेव हि। केचिद्वदन्ति सब्रह्मा केचिद्विष्णुः प्रकथ्यते। केचिद्रुद्र महापूर्वं एको देवो निरंजनः। आद्याशक्ति
दुरूपश्च सिद्धिः कारणमेव हि। सूर्याग्निरूपकं। महात्मा निर्विकारं सुदुर्ग्धं वायगोलकं। सत्यलोके वीज
तो देवं श्वेतकाकाररूपकः। इंद्रजालस्य दीपाभं चंद्रसूर्याग्निरूपकं। महाव्योमनि निर्विकारं सुदुर्घं वायगोलकं। सत्यलोके वीज
नो देवं श्वेतकाकाररूपकः। इंद्रजालस्य दीपाभं चंद्रसूर्याग्निरूपकं। तस्योर्ध्वे निजगुरुं पूजा ध्यानपरायणं। स्वकांतां पू
कोष्ठे चिंतामणिगृहे शुभे। ध्याये त्रिरंजनां देवीं रत्नसिंहासनोपरि। तस्योर्ध्वे निजगुरुं पूजाध्यानपरायणं। स्वकांतां पू
जयेद्देवं रजताचलमोहितां। सुरज्ञां चारुवदनां। स्वप्रकाशस्वरूपिणीं। एवं कांतायुतं देवं। स्वमूर्द्धि स्वं विचिंतयेत्। य १२
थाद्दर्शनगर्भेतु। परिपश्यति पर्वतं। सहस्रारे महापद्मे तथा देवं विचिंतयेत्। एवं ब्रह्मालयं चैतत् परं मोक्षालयं प्रिये॥ निर्गुण
स्वलयं साक्षात्। महाकाल्या जयं शिवे॥ तत्रैव वर्त्तते नित्यं निराकारात्मनि श्वरः। यस्य रूपं परानंदं परात्परजगत्पतिः

भिन्नानंदमयी देवी कालीकार्यः प्रकाशिनी। आद्याशक्ति महाकाली देवानि मोहकारिणी। जायंते च स्थितो वश्याय था
पयथांप्रलीयते। तोयात्तु बुद्बुदाकारं यथा तोये विलीयते। जलदेन तडित्पन्ने नीयते च यथा घने। तथा ब्रह्मादयो देवाः कालि
कायां प्रजायते। तथा प्रलयकाले तु पुनस्तस्यां प्रलीयते। शक्तिज्ञानं विना देवि मुक्ति हास्याय कल्पते। एकांशेन भवेद्र
शंभुः कालिकायाः कुलेश्वरे। अपरासा महाकाली नयादीनां समुद्रवत्। गोष्पदं च यथा तोये ब्रह्माद्या देवतास्तथा।
गोष्पदं किं विजानीयात् समुद्रस्य जलं शिवे। तेन ब्रह्मा न जानाति विष्णुः किं वेत्ति शंकरः। सृष्टिकर्त्री यदा कन्या तन्न्यं
ते च सुरादयः। तथा प्रलयकाले तु। पुनस्तस्यां प्रलीयते। अतो निर्वाणदा काली पुरुषः स्वर्गदः धनः। दक्षिणस्यां दिशि
संस्थितं च रवेः सुनः। काली नाम्ना पलायंते भीतियुक्तः समंततः। अतः सा दक्षिणा नाम्नी त्रिषु लोकेषु गीयते। पुरुषो
दक्षिणे प्रोक्तो वामा शक्तिर्निगद्यते। वामया दक्षिणं जित्वा महामोक्षप्रदायिनी। अतः सा दक्षिणा नाम्नी त्रिषु लोकेषु विंधै
गीयते निर्गुणं पुरुषकाल्याः जंभते उत्पद्यते यतः। वैखरीयं महाविद्या कालिका जगदंबिका। साकारा काली चनकाकार
रूपा



रूपिणी। हस्तपादादि रहिता सो सूर्याग्नि रूपिणी। तस्याः स्थानं हि कथितं सत्यलोकं वरानने। यत्स्थानं सर्वदेवस्य प्रा
नीर्थसदा नेत्र। तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेधुना। सहस्रदलपद्मस्य चैकपत्रे सुलोचने। सहस्रगोलकं नीपा
तो वक्तुं न शक्यते। जन्मांतर सहस्रेण जिह्वाकोटिशतेन च। तद्वक्तुं नहि शक्नोमि एकपत्रस्य शोभनं। अतस्त्वं हि वरारोहे गि
वता भव पार्वति। किंजल्क मध्ये या शोभा किं वक्तुं शक्यते मया। तन्मध्ये कर्णिकां देवि तन्मध्ये वीजकोशकं। वीजकोशस्य मध्ये
तुसुरासागरं सुतम्। ज्ञेयं फलविस्तारं सुसुम्नं तोयमंडलं। तन्मध्ये तु मनीद्वीपं सहस्रयोजनं शिवे। पवितः पारिजातश्च वृदैस
वनं सुरमं। मध्ये कल्पद्रुमं तत्र ज्योतिर्मंदिरमुत्तमं। चतुर्द्वारसमायुक्तं हेमप्राकारभूषितं। मंदवायुसमायुक्तं गंधधूपसमन्वि
तं। देवकन्यासहस्राणि परिचर्या परायणी। तस्योपरि स्थितं रत्नसिंहासनं शिवे। महाकाली महारुद्र श्वेतकाकाररूपकं १३
इंद्रजालस्य दीपाभं महाज्योतिः सनातनः॥ इति ते कथितं कांते सम्प्रत्यर्थं श्रीमेनादि। श्रावागोपयत्नेन प्रकाश्यं च
राजनः। अतिस्नेहेन देवेशि तवस्याने प्रकाशितं शंक्षेपेण समायुक्तं विस्तारेण नहि शक्यते॥ ०॥ इतिश्री निर्वाणतंत्रे

देवीश्वर संवादे दशमः पटलः॥ १०॥ ०॥ श्री चंडिकोवाच॥ तत्त्वज्ञानं महादेव परित्राहं नचान्यथा। इदानीं श्रोतुमिच्छामि
तत्त्वज्ञानं सुदुर्लभं॥ श्रीशंकर उवाच॥ तत्वज्ञानादिकथने शंकते मम मानसे। एतत्प्रसंगश्रवणे पितामबपावति येन ज्ञानप्र
साद्दे विष्णुः सत्वगुणाश्रयः। श्रृणु देवि प्रवक्ष्यामि ब्रह्मलोकपितामहः॥ तत्त्वज्ञानं विना प्रसोऽपि शंभुः संहारकारके
श्च भुक्तास्वयि सर्वेतिपितत्व प्रसीदता। तत्वज्ञानं परमेशानि कथ्यते मया विरता भवद्देवेशि नाहं पृच्छ पुनः पुनः॥ इति तस्य वचः
श्रुत्वा शांकरी वाक्यमब्रवीत्। यदि तत्वं महादेव नमे कथयसि प्रभो। प्राणत्यागं करिष्यामि पुरस्ते च न संशयः॥ श्रीशंकर
उवाच॥ श्रृणु देवि प्रवक्ष्यामि तत्वं परमदुर्लभं। श्रुत्वा गोपय यत्नेन स्वयोनिरिव पार्वति। मद्यं मांसं तथा मत्स्यं मुद्रा मैथुन
मेव च। पंचतत्त्वमिदं देवि निर्वाणमुक्ति हेतवे। अष्टैश्वर्यं परं मोक्षं मद्यपानेन शोभने। मांसभक्षणमात्रेण साक्षात् नारायणो
भवेत्। मत्स्यभक्षणमात्रेण काली प्रत्यक्षतां भवेत्। मुद्रासेवन भूपूज्यो विष्णुरूपधकः। मैथुनेन महायोगी मम तुल्यो भ
नरास्तप. वेन्नरः। तंत्रांतरेपि देवेशि मयैव कथितं प्रिये। [illegible] मयैव कथितं पुरा। तत्वज्ञानमिदं देवि निर्वाणमुक्ति ए
पुरा।

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुक्तिकारणं। एकत्र पंचभूतदेह। स्वपवंशं शरीरायं न शंसयः। वीरता भावसर्वेत्र नोपाया हा चिंत्यया। ब्राह्मणोनैव
यद्दत्तं तन्मात्रं भोजनं तत्त्वा पंचतत्त्वं सदा सेव्यं गुरुप्रभावेन जीयते। सदैव मानसी सदा भानसतर्पणं। त्रिसंध्यं मानसं यागं ना
भिकुंडे प्रयत्नतः षड्वर्गेषु जितो भूत्वा नको नारायणः स्वयं। भवत्येव न संदेहो दंडधारणमात्रतः। पितृवंशे सप्त दंसी मा
तृवंशे त्रयोदश। कांतायाः सप्तभश्चैव लक्ष्मीनारायणो भवेत्॥ इति श्रुत्वा वचस्तस्य शिष्यश्चैतान् ब्रवीद्वचः। यदुक्तं मयि
मुक्त्यर्थं तत्करो तिनिरंतरं। पंचतत्त्वं सदा सेव्यं कस्मात् त्याभं वदस्व मे॥ यत्रैव वर्त्तते दंडी वद शिष्य समाहतः। तत्र गत्वा
प्रयत्नेन पंचतत्त्वविचेष्टितं। अथवा वीरमध्येतु यत्नेन गमनं चरेत्। तत्त्वज्ञानी गुरुस्तस्य सन्निधानेन कुलेन किल। सुदूरभ
यिगंतव्यं यत्रास्ते कुलनायकः। भिक्षाचर्यान चस्वार्थं देवताया कृते पुनः। आचार्यपत्नीं दृष्ट्वा तु देवताया कृते पुनः। १४
आचार्यपत्नीं दृष्ट्वा तु भिक्षां कुर्यात् समाहितः। हे मातर्देहि मे भिक्षां कुर्वीत पयाम्बहं। एवमुक्त्वा ततो दंडी महाशंका
समाचरेत्। कुंतोतिके समानीय स्रोभयो विधिपूर्वकं। ततो हुनेत् कारंध आज्यैरष्टाहुतिं पुनः। विपरीतक्रमेणैव कुर्यात् दुग्धपि
शोधनं। ततः कुर्यात् प्रयत्नेन अंतर्यज्ञोपवीतकं॥ ०पत्र

तत्त्वानियत्रैव मिलनं न भवेत्। तत्रैवाहं प्रवस्यामि तेन रामतः समीक्षदा। नारी कालिकारूपा च तेन तस्यां प्रलीयते। येन राः सा
धुरूपाश्च तत्त्वज्ञानपरायणाः। जीवन्मुक्ताश्च ते प्रोक्ता ब्रह्मरूपा न चान्यथा। सायोज्यादि महामोक्षं नियुक्तं तानि यादिषु। ब्रा
ह्मणः परमेशानि यदि तत्त्वपरायणाः। जीवन्मुक्ताश्च ते प्रोक्ता सत्यं सत्यं पुनः सत्यं परे तत्त्वे प्रलीयते। यथा तोयं तोयमध्ये
लीयते परमेश्वरि। तथैव तत्त्वसेवायां लीयते परमात्मनि॥ इति ते कथितं कांते तत्त्वज्ञानं विमोक्षदं। येन विज्ञानमात्रेण मोक्ष
सिद्धिर्न संशयः। शिलितं विना यदा नास्ति संस्थितेः कारणं सदा। तोयं विना यथा नास्ति पिपासा नाशकारणं। तमो हन्ता यथा
नास्ति भास्करेण विना प्रिये। विना वह्निप्रयोगेन यथा किं विलयप्रते। विना चंद्रेण देवेशि सुधावृष्टिर्न जायते। मातृगर्भं
विलीकांते उत्पत्तिरन्यथा भवेत्। तत्त्वज्ञानं विना देवि यथा मुक्तिर्न जायते। अत एव महेशानि गोपनं कुरु यत्नतः। दिव्य
भावयुता नां वै न तत्त्वज्ञानं सदा चरेत्। वीरभावयुतानां वै तत्त्वं सेव्यं सदानघे। न पशोरालये कुर्यात्। न पशोर्ज्ञानगोचरे॥
न पशोः सन्निधानेन न पशोर्दृष्टिगोचरे। अन्यथा पशिकीटस्य दर्शनेन क्रियाकारयेत्। सिद्धिर्विनश्यन्ति सुप्राज्ञे यत् कृत्वाति

शोधनं। ततः कुर्यात् प्रयत्नेन अंतर्यज्ञोपवीतकं। सिद्धिमाप्नुयात्। एकां शक्तिं समानीय एकैकः साधकः सदा। पूजयेद्गुरु
यतेन पंचतत्त्वेन कौलिकः। एवं कृत्वा लभेत् सिद्धिं नान्यद्दृष्टिगोचरे॥ श्रीचक्रपूजा यत्रैव तत्रैव धनसिद्धये। सिद्धिर्न जा
यते तत्र कदाचिदन्यसन्निधौ। यत्रैव कामना सिद्धिर्यत्र चक्रं प्रपूजयेत्। आयुरारोग्यमैश्वर्यं श्रीचक्रपूजया जयेत्। की
र्तिवृद्धिर्यशो वृद्धिर्भुक्तिभागी न संशयः॥ वांछासिद्धिज्ञानसिद्धिर्देव्याः प्रीतिश्च जायते। श्रीचक्रपूजां यः कुर्यात् स एव
व शंभुरव्ययः। अश्वमेधसहस्राणि वाजपेयशतानि च। दृष्ट्वा यत् फलमाप्नोति तत्फलं कौलिकार्चने। वापीकूपतडागादि
दत्वा यत् फलमाप्नुयात्। तत्फलं कोटिगुणितं यदि चक्रं प्रपूजयेत्। तन्मध्ये वर्त्तते देवि यदि युक्तो नरः। शिवबुद्ध्या प्रपूजयेत् कि ध्या
भ्रांतिस्तत्र विवर्जयेत्। [illegible] प्रति [illegible] वस्थान्। तत्तोये पति पश्यति गंगतोये यथा सूर्यं तीनतोये यथा पुनः। सूर्यस्य द १५
र्शनं नास्ति। सूर्यैकः प्रतितिष्ठति। तथैव परमेशानि साधके दूषणं। मंत्रधारणमात्रेण तदात्मा तन्मयो भवेत्। अत एव

महेशानि दूषणं नास्ति चेतसि॥ चेतः पवित्रं परमं। शक्तिमोक्षस्य कारणं। पूजाहीना च या शक्तिर्जपहीना च या
पुनः। धृत्वा साधक वेतन्यमाना नारी कालिका स्वयं। भ्रांतिरनकर्त्तव्या यदि मुक्तिं प्रयच्छति। नानारीभ्रांतिसंयुक्ता भ्रा
गता चक्रमंडले। सप्तजन्म निसा नारी चांडाली पतिवर्जिता। एवं विरूपायां नारीं मवश्यं कुरुते यदि। धनपुत्रवर्जि
तश्च स चांडालो न चान्यथा। इति ते कथितं कांते तत्त्वज्ञानं विमोक्षदं। येषां गेहे महेशानि तत्त्वज्ञानं प्रमोदितं। तेषु नर्जन्मा
गर्भे न विशंति कदाचन। जीवन्मुक्तास्च ते प्रोक्ता शिवरूपाश्च ते नराः। शृणु देवि प्रवक्ष्यामि कौलिकस्य च लक्षणं। यस्मिन् देवे
यद्वाक्यं निर्दिष्टं मंत्रसाधने। तद्द्वार विशिष्टा पाः कौलिकास्ते वकीर्तितः। शैवे शाक्ते गाणपत्ये सौरे चांद्रे सुलोचने। तत्त्वं ज्ञान
मिदं प्रोक्तं वैष्णवे शृणु यत्नतः॥ ०॥ इति निर्वाणतंत्रे देवीश्वरसंवादे तत्त्वविवरणं नाम एकादशः पटलः ११॥ ०॥ श्रीचं
डिकोवाच। शृणु नाथ परानंद मम प्राणेश्वर प्रभो। वैष्णवस्य च यत्तत्त्वं तन्मे ब्रूहि जगत्पते॥ श्रीशंकर उवाच। शृणु तत्त्वं व
रारोहे वैष्णवस्य त्रिलोचने। गुरुतत्त्वं वर्णतत्त्वं मंत्रतत्त्वं सुरेश्वरि। देवतत्त्वं ध्यानतत्त्वं पंचतत्त्वं [illegible] वराणने तत्रादौ श्रीगुरोः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तोत्रं स्तोत्रकृत्पापमिपार्वति। सतैलंवर्त्तिकायुक्तं देहस्थंब्रह्मतेजसं। गुरुणामंत्रदानेनतत्वमुत्तदीपितंभवेत्। देवतायाःसरी
रंहि वीजाक्षुरप्युते ध्रुवं। एवंहितस्यात्मादेवरूपोनसंशयः। ईश्वरस्यतु षड्वीर्यं तदेव अक्षरान्वितं। तेनवर्णात्मकेदेहं जंतोरेवन
शंसयः। मंत्रवर्णस्वरूपेणानीयन्ते परमेश्वरि। वर्नेतत्वमिदं देवि ममसर्वस्वयद्भवेत्। स्वयंदेवोनचान्योस्मि निर्मदेवरूपकः
सर्वत्रदेवतांध्यायेत्तरुणगुरुस्मलतादिषु। ध्यानेनलभतेसर्वं ध्यानेन विष्णुरूपकः। ध्यानेनसिद्धिमाप्नोति विनाध्यानेन सिध्यति।
इतितेकथितंदेवि वेसर्वस्यसुरेश्वरि। यस्यज्ञानादमरत्वं विष्णुचविष्णुरूपान्नचान्यथा। यःकुर्यात्परमेशानि तत्वज्ञानंमयोदितं
स्वर्गभागीभवेन्मर्त्यो विष्णुलोके वसेत्सदा। यदिशान्तियुतोमर्त्यो मनसा चिंतयेत्सदा। तेनवानीं गच्छति कदा विष्णुममंदिरे। इ
तितेकथितंदेवेश दशाक्षरेश्वरि। यज्ज्ञानादमरत्वंचलभतेनात्रसंशयः॥०॥ इति निर्वाणतंत्रे श्रीविष्णोस्तत्वकथनंनामद्वा
दशःपटलः १२॥०॥ श्रीचंडिकोवाच। स्वच्छात्मकंदशार्णं च पुरैवकथितं तुभो प्रकाशरूपेन मंत्रं कथयस्व दयानिधे॥ श्री १६
शिवउवाच॥ शृणुदेवि प्रवक्ष्यामि मंत्रंदशाक्षरंपरं। यस्यश्रवणमात्रेण गूढोपि विष्णुरूपधृक्। एवंमंत्रोपि चदेवेशि शक्तिमेत्रं

जपेद्यदि। अज्ञात्वातन्महामंत्रं सभवेद्ब्रह्मराक्षसः। अज्ञात्वातन्महामंत्रंतत्वज्ञानीभवेद्यदि। तथापिनरकंगच्छेदितिदेवस्यसंमतं
शृणुदेवि प्रवक्ष्यामि दशार्णं मंत्रमुत्तमं। मायावीजंवधूवीजं लक्ष्मीकालीचपाशकं। गगनंपाशिवीजंच वह्निकोणानतः प्रिये।
इतितेकथितंकांते दशाक्षरमनुत्तमं। यज्ज्ञानादमरत्वंच लभतेनात्रसंशयः। अस्यग्रहणमात्रेण नरोनारायणोभवेत्॥ अस्यप्रसादमा
त्रेणदंडी निर्वाणतांव्रजेत्। दंडीपाति जपेदेनं तु दशार्णं परमेश्वरि। अस्यमंत्रा महामंत्राजायंते नात्रसंशयः। सर्वदेवाःसदाचास्य दश
णीजायतेध्रुवं। महाविद्योपाशकश्चदशार्णंनहिपश्यति। इहलोकेदरिद्रःस्यात्परेचब्रह्मराक्षसः। तस्माद्यत्नेन देवेशि दशार्णमा
श्रयेद्गुरुः। यथामरतरंगिण्याः नसमाःसकलाःपगाः। दशार्णस्यसमोनास्तिमंत्रोपिसुरपूजितः। मत्समायदिनारीचतत्समःपुरुषोस्ति
चेत्। दशार्णस्यसमोमंत्रः कथयामि वरानने। दशकार्णस्यस्वर्णस्य सदृशंलोहमस्तिचेत्। दशार्णस्यसमोमंत्रः कथयेपुनरप्रिये। श्री
प्रसादादयंमंत्रोदशार्णःपरमेश्वरि। उद्धृत्यायेमहामंत्रे माहात्म्यं कथयामिते। अतःपरंप्रवक्ष्यामि यद्रूपंदंडधारिणः। साधुरूपो
गृहस्थश्चब्राह्मणोब्रह्मवादिनः। सर्वमायापरित्यक्तः सदाधर्मपरायणः। जितेंद्रियो जितक्रोधः समत्वंसर्वजातिषु पुत्रेरिपौसमत्वंच

सर्वजातिषु। पुत्रेरिपौसमत्वंच समस्वर्णंचपार्थिवे। दयाभावश्चसर्वत्र पुत्रेमित्रेरिपौभवेत्। लाभालाभेजयेनाशे निशायांपौलिकेतथा
कायेप्राणेनसंबंधोमृत्युरत्ययुगांतिके। ब्रह्मज्ञानंविनाज्ञानंयस्यचित्तेनविद्यते। सन्यासधर्मेतस्यैवनान्यस्यसुरपूजिते। सन्या
संधारणेकार्यंविप्रस्यमुक्तिहेतवे। [illegible] नारायणःस्वयं। चतुर्भुजाःप्रजायंतेदंडधारणमात्रतः॥
सर्वलक्षणसंयुक्तोब्राह्मणोगमनंचरेत्। गत्वाचदंडिनंदृष्ट्वा प्रणमेद्दंडवत्क्षितौ। त्वमेवदेवदेवेश त्वमेवत्राणकारकः। त्वमेव
जगतांवंद्य त्राहिमांशरणागतं। इतिश्रुत्वादंडधारीपप्रच्छसादरांजलिं। कस्त्वंकस्यसुतस्त्वंहि कथमागमनंवद। श्रुत्वादं
तद्वचनंविप्रःप्रोवाचात्मनिवेदनं। विप्रवंशेसमुद्भूतो ह्यमुकोहं द्विजेश्वरात्। नास्तिमेपितरौसाक्षात्। नास्तिमेस्त्रीसुतादयः। मन्मे
चमातापितरौभ्रातोभ्रातादयःसुताः। पश्चात्स्वकांतानाशेतु ह्यहमत्यंततापवान्। अतएवहिभोस्वामिन्देहिमेपरमेपरमाश्रयं। स १७
त्यंकुरु द्विजश्रेष्ठो यद्युक्तंचेममांतिके। मिथ्याभाषणदोषेण ब्रह्मवर्त्मविवर्जितः। भवत्येवनसंदेहो द्विजमत्पुरतोवद। स्थितोयोयो
वनायांचकांतायांपरमेश्वरि। सर्वंहिविफलंतस्यःकुर्याद्दंतथावनं। सन्यासेविफलंतस्यघोरंदाराख्यंगमिष्यति। विद्यतेवाम

भागेनयस्यकांतासुतस्तथा। सन्याधारणंतस्या वृथाहिपरमेश्वरि। सगुरुश्चापि शिष्यस्य रौरवाख्यंप्रयच्छति। इत्यादिदृष्ट्वा
श्रुत्वाश्रुत्वादंडीजितेंद्रियः। सन्यासदानंतस्यैवदद्यान्मुक्तिंचसाश्वतीं। आदौदशाक्षरंमंत्रंप्रथमेश्रावयेद्गुरुः। तच्छ्रुत्वाचमहा
वत्मगमनंकारयेत्ततः। क्रोशंवाक्रोशयुग्मंवा वेगेनगमनंचरेत्। गुरुणासहशिष्येण पृष्ठेपृष्ठेविधानतः। तिष्ठतिष्ठम
हावीहामांत्यक्त्वानहिगच्छतु। शिष्यःपरमहंसस्त्वंत्वत्समोनास्तिभूतले। संतेवंअपराधंमे त्वमेवविष्णुरूपधृक्। त्वमेवज
गतांवंद्य त्वमेवसर्वपूजितः। त्वमेवपरमोहंसःतिष्ठतिष्ठसुमांव्रज। सशिष्यदंडिनांदेवि इतिवाक्यंवदेद्यतः। अतःसःपरमो
हंसःपथिशेतेप्रमोदितः। तस्यैवदर्शनार्थाय अंतरीक्षेचदेवताः। सस्त्रीकाःसपरीवारा आयांतिदिग्विदिक्षुच। एतस्मिन्सम
येदंडी। शांतयेत्शिष्यमुत्तमं। फुत्कारंवक्त्रतोदत्वा मंत्रेणानेनसुव्रतः। फुत्कारैर्वायुयोगैश्चपुनःप्राणंवियोजयेत्। जन्मांत
रंतुतस्यैवतत्क्षणेजायतेकिल। जन्मांतरंसमालोक्य संस्कारमाचरेद्गुरुः। दंडानिकेसमानीय अन्नप्राशनमाचरेत्प्रिये। ततःपिंड
डिनोदेवी शिष्यायज्ञानहेतवे। श्रवणेशिष्यमहावीरमद्वाक्यंहृदयंकुरु। जन्मांतरंतुतस्यैवपृथिव्यांनाधिकारिता।०॥०॥०॥०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मतदेह स्वरूपो वंसंशरीरोयंनशंसयः। वीरस्य भावसर्वचेष्टोपायाहारचेष्टया। ब्राह्मणेनैवयद्दत्तं। तस्मात्तेभोजनंतव। पंचतत्वं
सदासेव्यंगुप्तभावेनजीयते। सदैवमानसीपुजा सदामानसतर्पणं। त्रिसंध्यंमानसंयागंनाभिकुण्डेप्रयत्नतः। सदैवमानसंभोगं
त्यागंकुरुप्रयत्नतः। षड्वर्गेषुशुजितोभूत्वानकोनारायणः स्वयं। भवत्येवनसंदेहो दंडधारणमात्रतः। पितृवंशेसमुद्भवसोम
तवंशेत्रयोदशः कांतायाः सप्तमश्चैवलक्ष्मीनारायणोभवेत्॥ इतिश्रुत्वावचस्तस्यशिष्यश्चैवमानन्दबीहूक। यदुक्तंमयिधर्मा
र्थंतत्करोमिनिरन्तरं। पंचतत्वंसदासेव्यंकस्मात्त्वभंवदस्वमे॥ पत्रैववर्त्तते दंडी वक्रशिष्यसमावृतः। तत्रगत्वाप्रयत्नेनपं
चतविचेष्टया। अथवावीरमध्येतुपत्नीतगमनंचरेत्। नत्वज्ञानीगृहस्थस्यसन्निधानेव्रजेत किल। सुदूरमपिगंतव्यंयत्रा
स्तेकुलनायकः। भिक्षावर्यानचस्वार्थंदेवतायाःकृतेपुनः। आचार्यपत्नीदृष्ट्वातुभिक्षांकुर्यात्समाहितः। हेमातर्देहि १८
मेभिक्षांक्लीं जीं तर्पयाम्यहं। एवमुक्त्वा ततोदंडीमहासंस्कारमावरेत्। कुंतोतिकेसमानीयहोमंभयेद्विधिपूर्वकं। ततोग्
नेत्कर्णंथत्वा आजैरष्टाकृतिंपुनः। विपरीतक्रमेणैवकुर्याद्धुत्थविशोधनं। ततः कुर्यात्प्रयत्नेन अंतर्यज्ञोपवीतकं। शिखा

तस्यशिखामंत्रैः पुष्पमध्येनिधापयेत्। मूलेनयत्नमंत्रैस्तु। तस्मिन्नेवनिवेशयेच्छौम्रतिकयापूर्णं। विलिप्यशोधयेत्ततः [illegible] मंत्रेण
कुंडमध्येविनिःक्षिपेत्। पूर्णाहुतिंततोदद्यात्तत्पूर्णमानयेत्सुधीः। सयज्ञसूत्रंसशिखंतत्पूर्णेयर्पयेत्प्रिये। मूलमंत्रंजपेत्तत्र गजांत
कसहस्रकं। ततश्चश्रावयेन्मंत्रंकालिकायाश्चसुंदरि। अथश्रावयेन्मंत्रंतारायाःपरमदुर्लभं। मूलमंत्रंसमुच्चार्यपूर्णभस्मप्रयत्नयुः अ
श्रणात्तत्क्षणात्साक्षाद्दंतयज्ञोपवीतवान्। भवत्येवनसंदेहो। नरोनारायणःस्वयं। विघ्नदंडंसमानीयवंशस्यैकंसमाचरेत्।
विघ्नदंडेन्यसेन्न्यासात्कालिकायाःप्रयत्नतः। जीवन्यासंततःकृत्वाकुंडेनियोजयेत्। इष्टदेवीस्वरूपायंदंडोयंपरमेश्वरि। शिष्य
स्यदक्षिणेहस्तेदंडस्थापनमाचरेत्। कमंडलुंसमानीयवारुणंप्रजपेत्सुधी। वारुणीनिक्षिपेत्ततोमूलमन्त्रंजपेत्। अष्टोत्त
रशतंजप्त्वातस्यवामकेन्यसेत्। गैरिकंकौपिनंवस्त्रंयत्नेनपरिधापयेत्। दंडनारायणमात्रेणनरोनारायणोभवेत्। अथाव
धिमहामायादंडोधृतिविभावनात्। साक्षान्नारायणोमध्येसत्वेहिदयाधर्मपरोभव। नवमायापितास्वामी। सर्वदंडात्मकेस्थितिः
सोनुसृत्यगमनंगेहे गृहस्थस्यपद्मजस्य। नारायणंसमाभाष्य। द्वारेतस्यव्रजेत्सुधीः॥ इतिश्रुत्वागृहस्थस्यपुटांजलिपरोभवेत्। द्वौचरं

डिनंदृष्ट्वा प्रणमेद्बालकोवरः॥ भिक्षांदद्यात्प्रयत्नेन। मधुमांसविनाप्रिये॥ आदायभिक्षांदेवेशि। चौरवद्गमनंचरेत्। गृहस्था
लयेचैवतात्रिंवासंचकारयेत्। तथाहि नगरंगत्वा त्रिरात्रिवसतिंचरेत्। तीर्थभूमिंततोगत्वासप्तरात्रंवसेत्ततः। ब्राह्मणोदंडिनंदृ
ष्ट्वा प्रणमेद्विधिपूर्वकं। तोयपूर्णंचदेवेशि किंवाशून्यकमंडलुं। दृष्टिमात्रेणतत्पात्रेपूर्णंकुर्याद्द्विजोत्तमः। कुशाग्रमात्रंयद्वि
दुंयद्दिदधात्कमंडलुं। दृष्टिमात्रेणतत्पात्रंपूर्णंकुर्याद्द्विजोत्तमः। कुशाग्रमात्रंयद्बिंदुंदद्यात्कमंडलौ। समुद्रसप्रदानस्यफलंसल
भेतध्रुवं। दद्यान्नयदिमोहेनसभवेत्पापदायकः। त्रिंशद्वर्षसहस्राणिउषरेविट्पोभवेत्॥ इतिनेकथितंदंडसन्न्यासधारणंपरं
नवक्तव्यंपशोरग्रेप्राणांतेपिकदाचन॥०॥ इतिश्रीनिर्वाणतंत्रेदेवीश्वरसंवादेसन्यासविवरणोनामत्रयोदशःपटलः॥१३॥०॥
श्रीशंकरउवाच॥ शृणुदेविप्रवक्ष्यामिअवधूतोयथाभवेत्। वीरस्यमूर्त्तिंजानीयात्सदातन्त्वपरायणः। यद्रूपंकथितंपूर्वंसन्या
सधारणंपरं। तद्रूपंसर्वकर्माणिप्रकुर्याद्धीरवत्तभः। दंडिनामुंडनंचासावश्यायोमाचरेत्तथा। तथानैवप्रकुर्यात्तुवीरस्यमुंडनं १८
प्रिये। असंस्कृतकेशाजालोमुक्तालंविकाचायं। अस्थिमालाविभूषणः। रुद्राक्षान्वापिधारयेत्। दिगंबरोवा वीरेंद्रश्चापकौ

पिनीभवेत्। रक्तचंदनदिव्यांगंकुर्यादङ्गभूषणं। क्षमादानंतपोध्यानंवीरभावेनशैलजे। शिवोहंभैरवानंदोसुकोहंकुल
नायकः। एवंभावपरोमंत्रीहेतुयुक्तःसदाभवेत्। सविंदासेवनंकुर्यात्सदाकारणसेवनं। भवेत्साक्षात्सपुरुषःशंभुरूपोनश
संयः। निर्वाणंखुक्तिमाप्नोतिब्राह्मणोवीरभावतः। अवधूतःक्षत्रियश्चसहयोगीनसंशयः। स्वरूपोपिभवेद्वैश्यःशूद्रोपिसहजो
क्ववान्। संपूर्णफलमाप्नोति। विप्रोनिर्वाणकंव्रजेत्। त्रिभागफलमाप्नोतिक्षत्रियोवीरभावतः। पादद्वयंचवैश्यस्यशूद्रस्यचैकपा
दकं। ब्राह्मणस्यविनान्यत्रसंन्यासोनास्तिचंडिके। कुर्यान्मोहनयोन्यत्र। सैवपापाश्रयोनरः। गुप्तभावेनदेवेशिशृणुमत्प्राणव
ल्लभे। सन्यासिनासदासेव्यंपंचतत्वंवरानने। द्वादशाब्दस्यमध्येतुयदिमृत्युर्नजायते। दंडोनोयेविनिक्षिप्यभवेत्परमहंसकः। अ
वधूताचारतः हंसःपरमपूर्वकः। सेवचानंदविख्यातोद्वादशाब्देसरसरस्वती। अवधूतस्यचाख्यातंशृणुष्वपर्वतात्मजे। व
णाश्रयभमतीचगिरीचपुरिरेवच। एकस्थानेचसंस्थित्वा इष्टध्यानादिकंचरेत्। योमेन्द्रदानतःप्राज्ञाःसकलःपरिकीर्तितः
अस्तकेशोजटाजूटःसदावातुलवतचरेत्। अंतर्यामीमहावीरोऽवर्णंशैवशैलजे। नानाशास्त्रबुधोविज्ञोनानाकर्मविशारदः। सेदृश

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवीभावेन भावयेन्मोक्षिचारणां। सत्त्वभावती वीरो महाज्ञानी जितेंद्रियः। सदाष्टवी हरो धीरः। कुलके शोद्गिंव
रः। सर्वत्र समभावेन भावयेद्यो नरोत्तमः। इष्टदेवी विना नास्ति सगिरीपारिकीर्तिनः। नानादेशेषु पीठेषु क्षेत्रेषु तीर्थभू
मिषु। नवमं कुरुते नित्यं कुर्यात् यत्नेन पूजनं। देवताया सदा ध्यानं गुरोः पूजनं तथा। मतयोगेषु योनिष्ठः स वीरः पूरि
देवच। अवधूताश्रमे देवि यस्य भक्तिश्च निश्चला। तस्य तुष्टा भवेत् काली किं न सिद्ध्यति भूतले। अवधूतं समालोक्य शि
वत्पूजनं चरेत्॥ शक्तितः पंचतत्त्वानि यत्नेनैव निवेदयेत्। अशक्तः परमेशानि [illegible] अवश्यं पूजये
४ द्वीवं गृहस्थः साधकः। यावे वीरं तं वीरं सम्भवेदा पदाश्रयः। ब्रह्मचर्यं प्रवक्ष्यामि श्रृणु देवि समाहितः। यस्य स्मरण
मात्रेण नरो नारायणो भवेत्। गैरिकं वसनं कुर्यात् देवताध्यानतत्परः। फलमूलाहाररतो दुग्धगव्यं समाहरेत्। शास्त्रो
नग्नस्त्रीयात् सुज्ञानी ततथा जेतं। ऋतुकालं विना नैव। संक्रांता गमनं चरेत्। गृहस्थापि महेशानि ब्रह्मचारीस्तदा गुरुः २०
उदासीनः कदाचिद्वै गुरुस्तस्मात् पिता भवेत्। तस्य शिष्यस्य कन्यां न कदाचित्। नरवलोमादिकं वत्स नन्यात् ब्रह्मचारिणः

सर्वत्रैव दयाभावं सदैव ध्यानतत्परः। त्रिशूलं धारयेत् वैकं त्रिशिखं वापि धारयेत्। ताम्रपुष्कं च रुद्राक्षं कर्णे युग्मे निवेशयेत्
यद्दे शेविद्यते वीरो ब्रह्मचारी तपोधनः। तद्देशो सुस्थिरा लक्ष्मी जायते मात्र संशयः। अथ वक्ष्ये गृहस्थस्य लक्षणं शृणु च
निजकांता सदा पूजा निजकांता
डिके पाठेहा भक्ष्याति नीनां सेवनं देव पूजनं पितृश्राद्धं कुलाचारं तत्वज्ञानं समाचरेत्। निजकांता सदा पूजा निज कांता
हि देवता। मानसं पूजनं कुर्यात् मानसे नास्ति पातकं। सर्वेषां पितृरूपो सौ गृहस्थः साधुरूपकः। सदा चारवनः श्रीमानसा
दायत्तपरायणः। स्थापयेत्। पंचतत्त्वा गेहे भये प्रपलतः। तदेव सर्वसिद्धीशो भवत्येव न संशयः। यस्मिन् मंत्रे विचारोऽपि सि
[illegible] धकोत्तमः।
हृदि गाणादूषणे। तत्तत्सर्वं महेशानि गृहस्थस्य सुनिश्चितं। सुनिश्चितं सुविचार्य महा [illegible] नयापि गृहस्थस्य सुविद्या
एको क्षरे तथा कूटे माला मंत्रादिके वने॥ वैदिके। विचारो नास्ति देवेशि सम्मलं छेन शुद्धि हि। तथापि गृहस्थस्य सुखिनी
[illegible] महाविद्या तु नद्यो नो दूषणं नास्ति सर्वमंत्रस्य दीक्षितो गृहस्थाश्रममाश्रित्य तत्त्वज्ञो सुब्रह्मवाहतः। सम्पुटः सर्वपापभय
सेवसा स्वामेकेश्वरः। अन्ये ज्ञानेन यात्यु न्ये हि मदानेनपतः। तं तत्सर्वं गृहस्थस्य नान्यस्य सुरवंदिते॥ इति ते कथितं का

२१

ते चतुराश्रमलक्षणं। नवमं पंचशेषे सपथो मे त्वयि प्रिये॥ ०॥ इति श्री निर्वाणतंत्रे चतुर्दशः पटल॥१४॥०॥
पत्र २ श्लोक ६ प्रमाण॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सन्दर्भग्रन्थसूची

गुप्त, अभिनव (२००२), *तन्त्रालोक (विवेकव्याख्यासहित)*, राधेश्याम चतुर्वेदी (सम्पा.), वाराणसी : चौखम्बा विद्याभवन ।

गोरक्षनाथ, (२००२), रामलाल श्रीवास्तव (सम्पा.), *सिद्धसिद्धान्तपद्धति*, गोरखपुर : गोरखनाथ–मन्दिर ।

ज.ब.रा.,धनशमशेर (वि.सं. २०२०), *प्रबुद्धसनातनरहस्य*, काठमाडौँ ।

तीर्थ, तारानन्द (वि.सं. २०६४), *वाममार्ग का यथार्थ स्वरूप* (कल्याण, शक्ति अङ्क), गोरखपुर : गीताप्रेस ।

नवमीसिंह (वि.सं. २०५४), *तन्त्रचिन्तामणि (पूर्वभाग)*, विद्यानाथ उपाध्याय (सम्पा.), दाङ : महेन्द्र संस्कृत विश्वविद्यालय ।

पौडेल, दुर्गादत्तशर्मा (सम्पा.) (वि.सं. २०६१), *शिवमहिम्नः स्तोत्र*, चितवन : भगवती देवी पौडल ।

मिश्र, परमहंस (सम्पा.) (२००२), *कुलार्णवतन्त्र*, दिल्ली : चौखम्बा विद्याभवन ।

वेदव्यास (वि.सं. २०४५), *भागवतमहापुराण*, गोरखपुर : गीताप्रेस ।

शास्त्री, रघुनाथ (सम्पा.) (१९४०), *मेरुतन्त्र*, बम्बई : लक्ष्मीबेंकटेश्वर स्टीम प्रेस ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वीर पुस्तकालय तथा राष्ट्रिय अभिलेखालयबाट प्रकाशित पुस्तकहरूको सूची

क्र.सं.	पुस्तकको नाम
१	अभिलेख (अंक १ देखि ३९ सम्म)
२	सूचीपत्र बौद्ध विषयक हस्तलिखित ग्रन्थहरू
३	सूचीपत्र हस्तलिखित नेपाली चिठ्ठी पत्र
४	नेपाली भाषामा लेखिएका हस्तलिखित ग्रन्थहरूको वर्णनात्मक सूचीपत्र
५	आयुर्वेद विषयका हस्तलिखित ग्रन्थहरूको सूचीपत्र
६	देवनागरी लिपिका हस्तलिखित ग्रन्थहरूको सूंचीपत्र
७	Catalogue of Tibetan Manuscripts (Vol. 1 to 11)
८	Catalogue of Guthi Paper (Vol. 1 to 2)
९	भूमिसम्बन्धी तमसुक ताडपत्र (अंक १ देखि ४ सम्म)
१०	कान्तिपुर शिलालेख सूची (अंक १ देखि ४ सम्म)
११	पुष्प चिन्तामणि
१२	राजविधान सार
१३	हस्तमुक्तावली
१४	अश्वमेधीय यात्रा
१५	ऐतिहासिक चिठ्ठीपत्र (अंक १ देखि ३ सम्म)
१६	कृत्यवाटिका
१७	बृहत् सूचीपत्र (अंक १ देखि १० सम्म)
१८	ब्रह्मशान्ति
१९	वास्तुशास्त्रीय ग्रन्थहरूको संक्षिप्त अध्ययन
२०	PAINTED ILLUSTRATIONS OF THE MANUSCRIPT COVERS IN NATIONAL ARCHIVES FROM NEPAL
२१	व्रतकल्पलतिका
२२	व्रतरत्न माला
२३	अगस्त्यसंहिता रत्न परीक्षा (वी.पु.)

क्र.सं.	पुस्तकको नाम
२४	हरमेखला पूर्वीखण्ड
२५	हरमेखला मध्यखण्ड
२६	SAARC Voyage from Banglore to Kathmandu
२७	ऐतिहासिक कुण्डली
२८	सिद्धान्त सारिणी
२९	भक्तपुर शिलालेख सूची
३०	संक्षिप्त सूचीपत्रम् (वी.पु.)
३१	सूचीपत्र ऐतिहासिक चिठ्ठीपत्र संग्रह
३२	नेपालभाषामा लेखिएका हस्तलिखित अभिलेख ग्रन्थहरूको वर्णनात्मक सूचीपत्र
३३	श्रीमद्वराहमिहिराचार्य विरचितम् विवाहपटलम्
३४	शिवधर्मोत्तर (शिवधर्म पुराण द्वितीयखण्ड)
३५	अजीर्णमञ्जरी (नेपाली-भाषानुवादसहित)
३६	वास्तु शास्त्र
३७	लिपि तालिका
३८	अनुपानमञ्जरी
३९	परातन्त्र
४०	प्रथम लगत (प्रथम, द्वितीय भाग)
४१	दङ्गीशरण कथा (प्रबन्धकाव्य)
४२	कालीतत्त्व
४३	पथ्यापथ्यविनिश्चयः
४४	वैद्यजीवनम् लोलिम्बराजकृतम्

नेपाल सरकार
संस्कृति, पर्यटन तथा नागरिक उड्डयन मन्त्रालय
राष्ट्रिय अभिलेखालय
रामशाहपथ, काठमाडौं, नेपाल
फोन नं.: ०१-४२००८५६, ०१-४२००८४५, ०१-४२००८४६
वेबसाईटः www.narchives.gov.np, ईमेलः mail@narchives.gov.np

CC-0. Nepal Sanskrit Academy, Kathmandu